No. १५८२

Title व्युत्पत्ति वाद टीकायां प्रथमा विभक्त्यर्थ निरूपणं

Author गदाधरः

Extent ९४ Age a

Subject न्याय वैशेषिकं

व्युत्पत्तिवादटीकायां प्रथमाविभक्त्यर्थनिरूपणम्

१५८२

६४ पत्रे

१५८३

व्युत्पत्तिवादटीका कृष्णंभट्टी [illegible]

व्यु.टी. ॐश्रीगणेशायनमः श्रीसरस्वत्यैनमः शाब्दबोधेचेतिसप्तमीनिरूपितत्वेचशाब्दः प्रसिद्धौएकपदार्थेघटेसप्तमीप्र
१ त्ययोगित्वे अपरपदार्थस्यनीलपदार्थस्यषष्ठी प्रतियोगित्वे संसर्गोऽभेदादिः संबंधमर्यादासमभिव्याहा
रज्ञानकार्यतावच्छेदककोटिप्रविष्टसंबंधत्वात्तृतीयाऽभेदेभासतेइत्यत्रभासनंविषयताआख्यातार्थः आश्र
यतातथाचघटरूपैकपदार्थानुयोगिकः नीलरूपापरपदार्थप्रतियोगिकोऽभेदादिसंसर्गः शाब्दबोधनि
रूपितसंसर्गत्वाभिन्नविषयताश्रयइतिवाक्यार्थः एकत्वमपरत्वंचनपदेत्वेति अन्यथाआख्यातार्थकनिवर्त
मानत्वायोः परस्परमन्वयोनस्यात् नाप्यर्थेनीलेघटइत्यादावभेदान्वयोनस्यात् नीलघटयोरेकत्वात् अपि
त्वपदार्थतावच्छेदकेनथाचैकंयत्पदार्थतावच्छेदकंतदवच्छिन्नेघटादावपरंयत् पदार्थतावच्छेदकंनीलत्वादि
तदवच्छिन्ननीलादेरभेदाद्यन्वयइत्यर्थः पदाद्युपस्थापितार्थस्यैवप्रकारतयाविशेषतयावभानोपगमेननी
लोघटइत्यादौनीलरूपाश्रयप्रकारकाभेदसंसर्गकघटविशेष्यकशाब्दबुद्धित्वावच्छिन्नंप्रतिप्रथमांतनीलप
दसमभि

१

व्याहृतप्रथमांतघटपदजन्योपस्थितित्वेन समभिव्याहाररूपकांक्षाज्ञानस्य कारणता एवं घटमानयेत्यादौ घटस्य
कारककर्मताविशेष्यकस्वाधेयतासंसर्गकशाब्दबोधत्वावच्छिन्नं प्रति घटपदाव्यवहितोत्तराऽम्पदजन्योपस्थितित्वे
न समभिव्याहाररूपाकांक्षाज्ञानस्य कारणतांगीकारादिति भावः सच संसर्गश्च क्वचिदभेदः नीलो घटस्त्या
दौ क्वचित्तदतिरिक्तएवेत्यादिः घटमित्यादौ कर्मत्वे घटादेराधारतानिरूपितकर्मत्वनिष्ठाधेयतासंबंधः
घटो नास्तीत्यादौ नञर्थेऽभावे घटनिष्ठप्रतियोगितानिरूपितानुयोगितासंबंधः घटं जिज्ञासत इत्यादौ सनर्थेच्छा
याज्ञाधात्वर्थज्ञानस्य विषयतानिरूपितविषयितासंबंधः विषयविषयिभावादित्यादिना पचतीत्यादौ आख्याता
र्थकृतौ धात्वर्थपाकादेर्जनितानिरूपितजनकत्वादिपरिग्रहः व्याससमासभेदेन विकल्पमाह अभेदस्येत्यादिना ·
स्वसमानविभक्तिकेन · स्वं विशेष्यवाचकं घटादिपदं तत्समानविभक्तिकं प्रथमांतं नीलादिपदं तेनोपस्थितस्यैव
नीलादिरूपाश्रयस्याभेदः संसर्गः व्यासे गतिमुक्त्वा समासे तामाह स्वाव्यवहितपूर्ववर्तिना वेति · स्वं विशेष्यवाचकं घटा

दिपदं तदव्यवहितपूर्ववर्तिनीलादिपदेनेत्यर्थः उपस्थितस्यैवेत्येवकारव्यवच्छेद्यमाह नन्विति नीलस्य घट इत्यत्र नील
पदार्थस्यासमानविभक्तिकपदेन षष्ठ्या व्यवधानात् अव्यवहितपदेन नाऽनुपस्थापितत्वादिति भावः नीलस्य घट इ
त्यत्र तु नीलपदोत्तरषष्ठ्यां घटपदाव्यवहितपूर्ववृत्तित्वेपि अयोग्यत्वान्न षष्ठ्यर्थसंबंधस्याभेदेन घटेऽन्वय नन्तु स्वस
मानविभक्तिकेनेत्यत्र स्वं विशेष्यवाचकं पदं तेन स्वेन समाना विभक्तिर्यस्येति विग्रहान्स्वतुल्यविभक्तिकत्वं विशे
षणपदे लभ्यते तच्च बाधितं विशेष्यपदस्य प्रातिपदिकत्वादिभक्तेः तद्भिन्नत्वात् अतः स्वसमानविभक्तिकत्वं परिष्क
रोति स्वसमानविभक्तिकत्वं चेति स्वसमानत्वं न तुल्यत्वमपि तु स्वपदलक्षणाया स्वप्रकृतिकविभक्तितुल्यत्वमेवं च
स्वं विशेष्यवाचकपदं प्रकृतिर्यस्य इदृशीयां प्रथमादिविभक्तिः प्रथमात्वादिना तत्सजातीयाविभक्तिर्यस्य तत्
स्वप्रकृतिकविभक्तिसजातीयविभक्तिकविशेषणपदं तत्त्वं विशेष्यवाचकपदोत्तरविभक्तिवृत्ति विभक्तिविभाज
कप्रथमात्वादिमद्विभक्तिप्रकृतित्वमिति यावत्· नन्वसमानानुपूर्वीकत्वं साजात्यमिति· नन्वविशेष्यवाचकपदोत्त
रविभक्ति

इति सकारद्वयसकारोत्तरउत्वद्रूपानुपूर्वीविशेषवत्त्वं विशेषणवाचकपदोत्तरविभक्तिनिष्ठमित्यर्थः वेदाः प्रमाणं
श्रुतं ब्राह्मणा इत्यादावन्वयबोधानुपपत्तेरिति । जसि जस्त्वद्रूपायाः सुविभक्तेः सुत्वद्रूपायाः आनुपूर्वीभेदात्साजा
त्यं न स्यात् प्रथमात्वादिना साजात्यमस्तीति त्वन्वयबोधानुपपत्तिरिति भावः या विशेष्ये दृश्यंते लिंगसंख्याविभक्तयः
प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे इति भर्तृहरिकारिकामर्थतोनुवदन् शंकते नन्विति विशेष्यायामित्यादिना
कारिकास्थप्रायः यदर्थमाह असतीति विशेषानुशासने इति विशेष्यायां सदैकत्वे इत्यादि विशेषानुशासनस्थले
त्वन विशेषणविशेष्यपदयोः समानलिंगसंख्यानियमः समानविभक्तेर्नियमस्त्वस्तीति प्राय इत्युक्तमिति भा
वः समानवचनत्वमित्यत्र वचनं संख्या अन्यथा विशेष्यविशेषणपदयोः समानवचनकत्वनियमाभावेत
थानियमोपगमेन समानवचनकत्वनियमांगीकारेण । प्रमाणमित्यस्य ल्युडंतत्वेन नित्यनपुंसकत्वादन्य
ल्लिंगतया वेदाः इत्यस्य च भिन्नलिंगत्वात्समानवचनकत्वाभावेन दोषायेत्याशयः शक्तिर्निरूपणतालोकशास्त्र।

व्यु टी. काव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यास इति हेतवस्तदुद्भवे इति काव्यप्रकाशकारिका॰ ननु शक्तिः कवित्वबीजभूतः संस्कारवि
२ शेषः स च वासनात्मा जन्मांतरीयरोहिकीना काव्यलोकशास्त्रादिज्ञानजन्या निपुणता कविशिक्षयाभ्यासश्चेति त्रयः
3 समुदिताः समुदितानां दंडचक्रादिन्यायेन फलोपधायकत्वेन॰ हेतुरित्येकवचनं न तु त्रयः हेतव इति समानलिंगत्वे
पि वचनैक्याभावानियमभंग इति भावः नादृशस्थले असमानलिंगकस्थले आपस्त्रीभूम्नीत्यादिवत्वबाध
कापेक्षनियम उत्सर्गः उत्सर्गात्मा नमौत्सर्गिकमेकवचनमेव विशेषणपदेनाप्युचितमिति प्रत्यक्षानुमानोप
मानशाब्दाः प्रमाणानि पितरो देवता इत्यादेरनुपपत्तिरिति पितामहप्रमितामहेषु पितर इति प्रयोगस्तु सपिंडीकर
णानंतरश्राद्धजन्यफलाभाक्त्वं पारिभाषिकं पितृत्वमादाय समर्थनीयः द्रव्यत्यागोद्देश्यत्वं च देवतात्वं न तु स
मानलिंगकस्थले समानवचनकत्वनियमांगीकारेण त्रयः समुदिता हेतवरित्यत्रानुपपत्तिसंभवेपि असमा-
नलिंगकस्थले न किंचिन्नियमनं निमित्तमिति कथं प्रमाणानीत्यत्र बहुवचनानुपपत्तिः शंकितेति चेन्न बहुवचन

प्रयोगे हि क्वचिन्नियमो नियामको यथा नीलाः घटाः इत्यत्र समानलिंगके समानवचनकत्वरूपः क्वचिच्च बहुत्वसं
ख्याबोधः यथा घटा नित्यत्र प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीत्यत्र तदुभयविधहेत्वभावात् प्रथमोपस्थित
त्वाच्चैकवचनप्रयोगस्यैव भावाख्यातवत्साधुत्वात् विशेषणपदोत्तरवचनेष्वनुगतं निमित्तमाहः यत्रेति। न
नु घटा नीला इत्यत्र विभक्त्यर्थः संख्यारूपः नीलावर्णा इत्यादौ तु गुणे गुणानंगीकारात् अपेक्षाबुद्धिविशेषविष
यत्वरूप एव विभक्त्यर्थो न तु संख्यारूपः इति शाब्दिकत्वस्य साधारणं विभक्त्यर्थधर्ममाहः विशेष्यवाचकपदो
त्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया विवक्षितत्वमिति तथा च नियमशरीरे न संख्यात्वेन न वाऽपेक्षा
बुद्धिविशेषविषयत्वेन विभक्त्यर्थस्य निवेशः किं तु विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयत्वेनेति नान
नुगम इति भावः घटा नीला इत्यादौ विशेष्यवाचकं घटपदं तदुत्तरजस्रूपप्रथमाविभक्तिस्तत्तात्पर्यविषयीभूता
बहुत्वसंख्या ततो विरुद्धैकत्वसंख्या तस्याः विशेषणपदोत्तरविभक्त्याऽविवक्षितत्वमेव विशेष्यविशेषणपदयोः

ब्रु॰टी
५

समानविभक्तिकत्वे नियामकमित्यर्थः अतएवेति ईदृशनियमांगीकारादेव पुरूरवोमाईनसौ विश्वेदेवाइत्यत्रवि
श्वेदेवाइति विशेष्यवाचकं पदं तदुत्तरविभक्तितात्पर्यविषयसंख्याबहुत्वसंख्यातद्विरूद्धसंख्यादित्वरूपासाधुपुरू
रवोमाईवसावित्यत्रविवक्षितैवेति नसमानवचनत्वं विश्वेदेवानांबहुत्वेपिद्वित्वविशिष्टयोरेवपुरूरवोमाईव
सोरेवंकालकामयोः तत्रतत्रकर्मणिपूज्यत्वविधानादितिभावः प्रभृत्योरितिप्रभृतिग्रहणं विशेष्यवाचक
विश्वेदेवपदोत्तरविभक्तितात्पर्यविषयबहुत्वसंख्याया अन्वययोग्यत्वंसूचयति विश्वेदेवानांबहुत्वात् तथा
हि॰ इंद्रस्यदुहितायेष्ठाविश्वानाममहातपाः तस्याःपुत्राःसमुत्पन्ना विश्वेदेवास्त्रयोदश॰ नैमित्तिकेकालका
मौकाम्येचधुरिलोचनौ आन्वष्टक्ये दिविर्देवानांयांसत्यवसूस्मृतौ पुरूरवोमाईवसौपार्वणेसमुदाहृतौ॰
यत्तेदत्तक्रतूनाकसदःसापिंड्यकेविदुावितिः इदमनन्तरं॰ कार्याव्यवहित् प्राक्क्षणाव
च्छेदेनकार्याधिकरणवृत्त्यभावप्रतियोगित्वंनस ।

५

कलशाद्देश्चालनीन्यायेनप्रतियोगित्वादतःतादृशप्रतियोगित्वानवच्छेदकशाब्दत्वरूपधर्मवत्त्वमेवशाब्दधियंप्र
तिकारणत्वंवाच्यंनत्वशाब्दत्वमेवेत्याह कृष्टत्वावच्छिन्नंयावच्छब्दनिष्ठमेकमेवेति यदिचशाब्दत्वमेवकार
णत्वंतदाकारणतावच्छेदकत्वंशाब्दत्वेनसंभवतिअभेदेऽवच्छेद्यावच्छेदकभावानंगीकारात् तथापितादृश
प्रतियोगितानवच्छेदकत्वविशिष्टशाब्दत्वस्यकारणत्वंस्वरूपनः शाब्दत्वस्यकारणतावच्छेदकत्वमितिनाऽपप
त्तिः संपन्नोव्रीहिरित्यनेकव्रीहितात्पर्यकेपिपदेतादृशव्युत्पत्तिसंकोचस्येति एकत्वंपदार्थतावच्छेदकेव्रीहि
त्वेन्वेति तथाचैकव्रीहित्वजात्यवच्छिन्नः क्षेत्रस्थः सर्वोव्रीहिः संपन्नः परिपक्वइत्यर्थः तादृशव्युत्पत्तिसंको
चस्यपदार्थः पदार्थेनानान्वेतिनतुपदार्थैकदेशेनेतिव्युत्पत्तिसंकोचस्य पदार्थः पदजन्यप्रतीतिविशेष्यः
पदार्थेनपदजन्यप्रतीतिविशेष्येनान्वेति तथाच एकपदार्थविशेष्यकापरपदार्थप्रकारकशाब्दबोधंप्रतिसमा
नविशेष्यत्वप्रत्यासत्त्यापदजन्यपदार्थोपस्थितिर्हेतुः क्वचिद्वेदाः प्रमाणमित्यादावनुभवानुरोधेनविशेष्यतयाएकता

वु.टी. पदार्थप्रकारकबोधे विशेषणतया प्रमाणादिपदजन्यपदार्थोपस्थितिर्हेतुः व्यभिचारवारणायाव्यवहितोत्तरत्व
५ संबंधेन कारणतावैशिष्ट्यनिवेशो बोध्यः एकदेशान्वयं परिहरति यद्वेति स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वसंबं
धेन प्रकृत्यर्थ एवान्वय इति स्वं व्रीहित्वपदोत्तरप्रथमार्थमेकत्वं स्वाश्रयीभूतं यत्प्रकृत्यर्थतावच्छेदकं व्रीहित्वं त
द्वत्वं तेन संबंधेन व्रीहावेवैकत्वान्वयो न तु प्रकृत्यर्थतावच्छेदकं व्रीहित्वे तेन न व्युत्पत्तिसंकोच इति भावः
उक्तसंबंधेनैकत्वविशिष्टो व्रीहिरित्यन्वयबोधः प्रकृत्यर्थतावच्छेदके एकत्वान्वयो न भवतीत्यत्र हेतुमा
ह व्रीहित्वादिजातेः स्वरूपत एव व्रीह्यादिपदशक्यतावच्छेदकतयाऽन्वयितावच्छेदकरूपेणानुपस्थितेरितीदं त
न व्रीहित्वे पदार्थान्तरस्यान्वयानुपपन्नेरित्यत्र हेतुत्वेनान्वेति किंचित्तत्रान्वयितावच्छेदकरूपेणानुपस्थितेरिति सम
र्थयते आहुः अनुपस्थितेत्यत्र व्रीहित्वे इत्यत्र हेतुगर्भविशेषणं प्रकृतेपीदृशे एवं गतिरिति वेदाः प्रमाणमित्यत्रैकमा
श्रयप्रमाणतावत्वसंबंधेनैकत्वविशिष्टयत्प्रमाणं तदभिन्ना वेदा इत्यर्थः शाब्दबोधमात्रे धर्मितावच्छेदकरूपेणोप

र्थोपस्थितेर्हेतुत्वादिति भावः यत्त्विति पदार्थतावच्छेदके स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबंधेन पदार्थे चेति पद
द्वये पि ज्ञाते रेकत्वभानोपगमो निरर्थक इत्यर्थः यतः स्वजातीयनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपसजातीय
द्वितीयरहितत्वं एकवचनार्थ इति भूतले एकघटसत्त्वदशायां अत्र घट इत्यादौ स्वं प्रकृत्यर्थः एतद्देशावृत्तिघटः त
त्सजातीयः स एव तन्निष्ठः एकपटादिभेदः तत्प्रतियोगितावच्छेदकं तत्पटनिष्ठमेकत्वं अनवच्छेदकं तद्घटनि
ष्ठमेकत्वं तदेव सजातीयद्वितीयरहितत्वं घटपदोत्तरमेकवचनार्थः तद्देशावच्छिन्नघटसत्त्वदशायां स्वसजातीयो द्वितीयोऽपि
घटस्तन्निष्ठैकत्ववद्देतद्घटभेदः तत्प्रतियोगितावच्छेदकमेव एतद्घटनिष्ठमेकत्वं एवं स्वसजातीये तद्घटनिष्ठभे
दप्रतियोगितावच्छेदकान्यैव एतद्घटभिन्ननिष्ठान्येकत्वानि इत्यनवच्छेदकैकत्वाप्रसिद्ध्या नात्र घट इति प्रयोगः
न त्वेकत्वमात्रं न तु संख्यारूपमेकत्वमात्रं · तस्य संख्यारूपैकत्वस्य वस्तुमात्रवृत्तित्वेन अर्थेन एव शाब्दे विनैव तद्बो
धेन शाब्दानपेक्षणादिति भावः अत्र प्रयोगाच्चेति · एकवचनान्तघटादिपदस्य द्व्यादिघटव्यावृत्तिरेव फलं तद

व्यु टी. ६ संभवाच्चेत्यर्थः ईदृशैकत्वार्थे उपष्टंभकमाह अतएवेति तादृशैकत्वस्य सजातीयेत्यादिनिरुक्तैकत्वस्य · साजात्यं च स्वस

मभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेणेति अत्र घटोस्तीत्यत्र स्वमेकवचनांतं घटपदं तत्स

6 मभिव्याहृतं पदं अनेनेति पदं न तदर्थः एतद्देशावृत्तित्वं तत्संसर्गित्वं तत्संसर्ग एव स च एतद्देशावृत्तित्वीयस्वरूपसंबंध

रूपस्तद्विशिष्टं यत्प्रकृत्यर्थतावच्छेदकं घटत्वं तेन रूपेण सजातीयः स एव घटस्तन्निष्ठो यः एकपटभेदस्तत्प्रतियो

गितावच्छेदकं तत्पटनिष्ठैकत्वं तदनवच्छेदकं घटनिष्ठैकत्वं तद्रूपपारिभाषिकसजातीयद्वितीयरहितत्वमेकवच

नार्थो घटोस्तीति पूर्वमुक्तं एतद्देशावज्ञघटसत्त्वदशायां तादृशवाक्यप्रयोगस्त्वज्ञातैकत्वादेरेव समर्थनीय इति · एतद्दे

शावज्ञघटसत्त्वदशायां अत्र घटोस्तीति प्रयोगो न भवति · यदि कदाचिद्भवति तदा घटपदोत्तरप्रथमैकवचनार्थ एकत्वं

घटत्वरूपजातावन्वेति तत्र प्रकृत्यर्थतावच्छेदकतावच्छेदकसंबंधेन समभिव्याहृतपदार्थसंसर्गिवृत्तित्वविशिष्ट

प्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मेण साजात्यं ग्राह्यं तथा च घटपदसमभिव्याहृतं अत्रेति समभिव्याहृतं पदं तदर्थः ए

तद्देशवृत्तित्वं तत्स्वरूपेण संसर्गी घटः तत्र घटे प्रकृत्यर्थतावच्छेदकतावच्छेदकसंबंधेन समवायेन वृत्तिर्यस्य ता
दृशं घटत्वं तत्त्वेन तादृशवृत्तित्वरूपं घटत्वेस्ति प्रथमप्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मो घटत्वं तत्त्वेन तदपि घटत्वेस्ती
ति सामानाधिकरण्यसंबंधेन समभिव्याहृतपदार्थसंसर्गिवृत्तित्वविशिष्टो यः प्रकृत्यर्थतावच्छेदकमा
त्रवृत्तिधर्मो घटत्वं तत्त्वेन धर्मेण घटत्वसजातीयं घटत्वमेव तन्निष्ठो यो भेदः एकत्ववत्पटत्वभेदस्तत्प्र
तियोगितावच्छेदकं पटत्वादि तन्निष्ठमेकत्वं तदनवच्छेदकं घटत्वनिष्ठमेकत्वं तदेव सजातीयवृत्तिपर
वृत्तित्वं घटपदोत्तरप्रथमैकवचनार्थः जात्येकत्वादेरेवेत्यादिपदान्त्वाश्रयप्रत्ययार्थतावच्छेदकत्वसंबंधे
न एकत्वस्य घटेऽन्वयः स्वं घटपदोत्तरप्रथमैकवचनार्थः एकत्वं तदाश्रयीभूतं प्रकृत्यर्थतावच्छेदकं
घटत्वं तद्वत्त्वं घटेऽस्तीति न दोषः अक्रे चैतत् घटत्वे एकत्वान्वयो न संभवति घटोऽस्तीत्यत्र घटत्वस्य स्वरू
पत एव घटपदशक्यतावच्छेदकतयान्वयितावच्छेदकघटत्वस्वरूपेणानुपस्थितेः अन्वयितावच्छे
दकरूपेणोपस्थितेरेव पदार्थान्तरान्वयनियमादिति मतान्तरमाह यत्त्वितिप्रभृदि समानाधिक

युं.टी
१
7

रोस्थानिन्यपि मध्यम इति पाणिनिसूत्रं युष्मद्युपपदे इति ३. वाच्यकारकवाचिनि प्रयुज्यमाने सति स्थानिनिग
म्यमाने वा सति मध्यमः पुरुषः प्रयुक्ते गम्यमाने वा उक्ते युष्मदि मध्यम इति हपुंक्तेः एवमस्मदीत्यस्य शेषे प्र
थम इत्यस्य चार्थ इति वैयाकरणमतेपि भावाख्यातप्रयोगो न स्प्रोति कर्तृकर्मकारकाणां तिङ्. वा[illegible]भा
वात् एवं न्यायनयेपि भावमपानन्निर्देशेन प्रयुक्तगम्यमानान्यतरयुष्मत्पदबोध्यनिष्ठयुष्मत्वे तिङे थैसंख्या
समानाधिकरणे सति मध्यमः पुरुष इत्यर्थकरणात् वर्तमानत्वाद्यर्थकभावाख्यातस्यावश्यकत्वेपि भाव
नान्वयिनि संख्यान्वयनियमेनात्र भावनान्वयविरहेण संख्यान्वयविरहादाह एकत्वादिवक्षायामयीत्या
दिः अलेजास्येकत्वपरतयात स्वमर्थेन तः एकत्वसमर्पणेन त्यर्थः प्रसपानो प्रकृत्यर्थान्वितस्वार्थ
बोधकतानियमभंगापत्तेरिति भावः दृष्टान्तदार्ष्टान्तिकपोर्वैषम्यमभिप्रेत्य समाधत्ते भावा
ख्यातस्य लेगात्यन्तरविरहेण विभक्तेर्निरर्थकत्वोपगमादिति भावाख्यातस्य लेखपत्ते श्या
दौ सुपोविभक्त्यर्थः एकत्वं विशेषणं वक्तव्यं नत्व स्वापत्वमाप्यानो हि कर्तृकस्त्वा ॥

१

यत्ववङ्ककर्तृकशाब्दबोधानां व्यावर्तनार्थमेव वक्तव्यं तच्च न संभवति। शाब्दत्वव्याप्यधर्माणां व्याहन्यातो कदा
प्यनवगमात् एकत्वविशेषणं व्यर्थमिति भावः व्याख्यातस्य संख्यार्थो नास्तीत्यर्थः। स्तूयते इत्येतावन्मात्रे शूपवत
कतिपयैरिति प्रश्नासंगतेश्च न संख्याविभक्त्यर्थः। तथा दिस्तूयते इत्यत्राख्यातार्थैकत्वस्य धात्वर्थे शाब्दे ऽ
न्वयांगीकारे एकः शाब्द इत्यन्वयो वाच्यस्तत्रैकस्मिन् शाब्दे मिहानाऽव्यवच्छिन्न मनोयोगरूपे कतिपयैरि
तिजिज्ञासाविषयमवट्टनिष्ठकृतिजन्यत्वं वाच्यं ते इति कतिपयैरिति प्रश्नासंगतिः। एवं शाब्दे द्वित्वबहुत्व
योरप्यसंभवात् स्तूयते स्तूयंते इति द्विवचनबहुवचनापत्तिरपि दृष्टव्या तस्मात्संख्यार्थाभावेन शाब्दत्वरूपे
णपात्र पस्यापि ते शाब्दे ऽन्तर्नीयानो घस्याऽव्यकृतेरणंतर्नीयार्थकृतिद्वारा ऽन्वयाभ्युपगमात् उक्तप्रश्नसं
संगतिरूपपद्यते इति। भावाख्यातस्थले स्तूयते इत्येतावन्मात्रोक्ते केन काभ्यां कैरित्येकश्रोतृजिज्ञा
साबोधकपदैर्विभिन्नविभक्तिकैः संख्याबोधकस्य श्रोतृगतां नाभावस्याभिव्यंजनान्नोपस्यान्नभव
वापित्तत्वादितिगुरवस्तदर्थमत्र अनेकविषयिणीया श्रोतृजिज्ञासानन्दोपकैरेकद्विबहुवचनै

8

नैः पदैः श्रोत्रगताभावस्याबाधयत्वव्याप्यधर्मेणाद्धिवङ्गकर्तृकस्वापत्वानोस्वापाग्नि नतिः उ. थैकत्वव्याहत्यानो
कदाप्यनवगमापावस्याद्धिवङ्गकर्तृकस्वापावगमरूपस्यस्वापाग्नितात्स्यानार्थैकत्वसंख्यावोधकस्याभि
वेजनादित्यनवयत्नप्याहि यावर्थस्वापेमिहानारूपवच्छिन्नात्ममनोयोगरूपेश्वाख्यानार्थैकत्वान्वये प्
कस्मिन् स्वापेपककर्तृकत्वमेवास्ति न हि वङ्गकर्तृकत्वमितिप्यावर्त्यमेवद्धिवङ्गकर्तृकत्वंमावर्नके
स्वापतिहमेकत्वं व्यंजयतिइति स्वापत्वव्याप्यधर्माणांद्धिवङ्गकर्तृकस्वापत्वानोऽप्रवगमप्रवश्रो
त्रगताभावरूपाख्यातार्थैकत्वंसंख्यावोधकइत्यर्थः नहोयस्याद्धिवङ्गकर्तृकास्वापवोधस्यानुभव
वाधितत्वादितिव्याहत्यानामेकत्वव्यंजकानाममावात्तसंख्याभावाख्यातार्थइत्यर्थः संभवत्यर्थस्याप्रवेप
दस्याप्रत्वमव्याप्यमित्यभिमेत्याहश्च त्रचेति श्रत्रचसंपन्नोव्रीहिरित्यादौ तत्र व्रीहिपदोत्तरप्रथमार्थैकत्व
स्यव्रीहिवेऽन्वयसंभवेनसमानतानाम्प्रैपकत्ववतयव्रीहित्वंतदवच्छिन्नसर्वोपिव्रीहिः संपन्न इति वोध
स्याऽभवत्सिद्धत्वाद्वेत्यर्थः नऽग्रसतिविशेषाऽशासनेनाविशेष्यविशेषणवाचकपदयोः ॥

समानवचनत्वमितिनियमस्यसमानलिंगकस्थलेएवाभ्युपगमेनवेदाःप्रमाणमित्यादिवत्पर्यवसितिवारणेपित्रयः
समुदिताहेतवइतिकाव्यप्रकाशव्याख्यायांप्रसंगातिर्दुर्वारैवेवलनप्राह एवंत्रयःसमुदिताहेतवइत्यत्रेति अत्र
विशेष्यवाचकेत्रयइतिपदेतडनरजसरूपविभक्तेस्तात्पर्यविषयीभूताबहुत्वसंख्यातद्विरुद्धासंख्याय
कत्वरूपासाचहेतुपदोत्तरप्रथमैकवचनेनविवक्षितैवेतिअविवक्षितत्वाभावात्त्रिपदस्यबहुवच
नांतत्वेपिहेतुपदस्यैकवचनांतत्वोपपत्तिःएवंचएकत्वविशिष्टएककार्योत्पादप्रयोजकतावच्छेदकस
मुदायत्वंनहेतुत्रयइतिवाच्यःअतएवेतिसमुदायत्वएकत्वांगीकारादेवेत्यर्थः तथासतितृणारणि
मणिन्यायेनशक्त्यादीनांकारणत्वांगीकारेसतिएषांशक्तिलोकशास्त्रकाव्याद्यवेक्षणजन्यानिपुण
ताकाव्यज्ञशिक्षाहर्षवेकाभ्यासस्त्रयएषामित्यर्थः एकैकसमवधानदशायामपि एषांमध्येकेवलश
क्त्यादिनाकाव्योत्पत्तेःशक्तित्वादिकमेवकाव्योत्पादप्रयोजकतावच्छेदकंनतुशक्त्यादित्रितयपर्या
प्तेसमुदायत्वमिति तेषांशक्त्यादीनांत्रेरकाव्योत्पादप्रयोजकतावच्छेदकसमुदायत्वाश्रयः

मु·टी
५

9

त्वानुपपत्तिरित्यर्थः एवं जात्याकृतिव्यक्तयः पदार्थ इत्यत्रेति· विशेष्यवाचकं पदं जात्याकृतिव्यक्तय इति प
दं तदुत्तरप्रविभक्तिजे सुविभक्तिस्तत्तात्पर्यविषयीभूता संख्या बहुत्वसंख्यानतो विरुद्धाएकत्वरूपा संख्या
सा विशेषणवाचकपदोत्तरस्वप्रथमया विवक्षितैवेति न विशेष्यविशेषणपदयोः समानवचनत्व
मिति एवं चैकत्वविशिष्टे पदशक्तिरूपे पदार्थत्वेन तद्वत्यः जात्याकृतिव्यक्तयः इति बोधः एवं च समानलिं
गकस्थले विशेष्यवाचकपदासमानवचनस्यापि विशेषणवाचकपदस्य साधुत्वे च समानलिंगस्थले श्रो
त्रादिकमेव सर्वत्र विशेषणपदानन्तरं प्रयोक्तव्यं वचनमिति प्रत्यक्षानुमानोपमानशाब्दाः प्रमाणा
नीति तत्पदे वेदाः इत्यादेरनुपपत्तिं वारयति एवं प्रत्यक्षानुमानेत्यादिना· द्विगिति शालाः सुधीत
रःपत्न्याः स्वामिनो देह देवप्रवित्यत्र शालपदस्य· बहुवचनान्तत्वस्य श्रान्तपदस्य बहुवचनान्तत्वेपि दे
वदेवरपदस्य द्विवचनान्तत्वोपपत्तिरिति अत्र विशेष्यवाचकपदं स्वामिश्वान्तरं इति पदं तदुत्तरा
जसूविभक्तिस्तत्तात्पर्यविषयीभूता बहुत्वसंख्यातद्विरुद्धासत्याद्वित्वसंख्या सा देवदेवरपदोत्तरं श्री

विभक्त्याविवक्षितैवेति मविवक्षितत्वाभावाद्देवदेवरपदे द्विवचनान्तत्वात् अत्र देवदेवरपदस्य देवदेवरपद
वत्त्वेऽलक्षणा तेन वाच्यतावच्छेदकयोर्देवदेवरपदद्वयोर्द्वित्वान्वयः पदरूपपदार्थतावच्छेदकभेदे सत्त्वाद्देवदेवपवि
त्वात्रद्वित्वोपि उपपद्यते दधि सुंदरमित्यत्र सुविशेष्यवाचकं पदं दधिपदं तदुत्तरत्वेन प्रतिसंधीयमाना विभक्तिः सु
विभक्तिः प्रथमात्वादिना तत्सजातीया विभक्तिर्यस्येति तत्त्वं सुंदरपदे इयमेवाकांक्षा वोध्या इत्यर्थः एवं इदं द
धीत्यादौ विशेष्यवाचकपदोत्तरत्वेन प्रतिसंधीयमाना विभक्तिः सजातीयविभक्तिकत्वमपि तथाविधविभक्ता
काहितत्वं सर्वैवर्तितत्वात्प्रतिसंधीयमानत्वमिति विशेष्यवाचके इदमिति पदे तदुत्तरविभक्तिः सुविभक्तिः
प्रथमात्वादिना तत्सजातीया विशेषणवाचकपदोत्तरत्वेन प्रतिसंधीयमाना विभक्तिर्यस्य तत्त्वं विशेषण
वाचके दधिपदेऽस्ति शंकते अपेति सामग्र्याः कार्यजनने आकांक्षायोग्यतादिना शाब्दबोधजनने वि
शेष्यविशेषणपदयोः समानविभक्तिकत्वरूपतथाविधनियमभंगप्रसंगात् परूपमयोजनत्वा।
नेरप्रतिवंधकत्वादित्यर्थः समाधत्ते तथाविधान्वयवोधोपपादिकाकांक्षा विशेष्यवाचकपदत्ति

व्यु॰टी
१
10

ष्टविशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतिकत्वंतन्नतथानीलघटमानयेत्यादावसंभवादितिनीलो
घटइत्यत्रविशेष्यवाचकंपदंघटपदंतत्प्रकृतिकायाविभक्तिर्द्वितीयादिविभक्तिस्तत्प्रकृतित्वं
विशेषणवाचकपदेनीलपदेऽस्ति एवंनीलघटइत्यत्रापितथाहिविशेष्यवाचकंघटादिपदंतत्
प्रकृतिकाविभक्तिर्द्वितीयातत्प्रकृतित्वंनीलपदेइतिविरुद्धविभक्तिराहित्यमेवसमासव्यासस्ता।
यारण्णीनीलादिप्रकारकाभेदसंसर्गकघटविशेष्यकान्वयबोधजनिकाआकांक्षानीलस्यघटइ
त्यादौतुविशेष्यवाचकघटपदात्प्रकृतिकाविभक्तिःषष्ठीविभक्तिस्तत्प्रकृतित्वमेवनीलपदेऽतो
ननीलस्यघटइतिवाक्यात्नीलप्रकारकाभेदसंसर्गकघटविशेष्यकशाब्दबोधःविशेष्यवाचपदेति
ष्टविशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपाकांक्षापानीलोघटइत्यत्राविशेषणवाचकंप
देनीलपदंतत्प्रकृतिकाविभक्तिर्द्वितीयादिविभक्तिस्तत्प्रकृतित्वंविशेष्यवाचकपदेघटपदेइति
नीलोघटइत्यादौमत्वेपिनीलघटमानयेत्यादौअभावात्नविशेष्यवाचकपदनिष्ठविशेषणवाचक

१

पदाप्रकृतिकविभक्त्यप्रकृतित्वस्यविनिगमनाविरहेणाकांक्षात्वमित्यर्थः नचनीलघटइतिसमस्तेविशेषणनीलघटमा
नयेत्यादिसमस्तानुसरणेकिंवीजमितिवाच्यं तत्रविशेषणवाचकपदाप्रकृतिकेत्यस्यविशेषणवाचकपदोत्तरत्वे
नाप्रतिसंधीयमानेत्यर्थकरणेनदोषस्तथाहिनीलघटइत्यत्रविशेषणवाचकंपदंनीलपदंतदुत्तरत्वेनाप्र
तिसंधीयमानायाविभक्तिर्द्वितीयाविभक्तिरेवनतुप्रथमाविभक्तिस्तदप्रकृतित्वंविशेषणवाचकपदेघट
पदेऽस्तीतिनदोषइत्याशयेननीलघटइतिसमस्तमुपेक्षितवान् नचनीलघटमानयेत्यत्रापिनीलेघटे
घटेचेतिपरिनिष्ठितविभक्त्यासमासाश्रयणात्तदोषइतिवाच्यंप्रथमांतेनसमासइत्यभिप्रायेणा
दोषाभिधानादितिनइतिसत्तः विशेष्यवाचकपदाप्रकृतिकत्वविशेष्यवाचकपदाउत्तरत्वंविशेष्यवाच
कपदोत्तरत्वेनाप्रतिसंधीयमानत्वमितिवानथाचविशेष्यवाचकपदानुत्तराविभक्त्यप्रकृतित्वरूपंप्र
थवाविशेष्यवाचकपदोत्तरत्वेनाप्रतिसंधीयमानविभक्त्यप्रकृतित्वरूपंवाविरुद्धविभक्तिराहित्यमे
वाकांक्षासानीलोघटइत्यादौनसंभवति तथाचविशेष्यवाचकंपदंघटपदंजदुत्तराविभक्तिस्तद्विभ

मु॰टी॰ ११

क्तिस्तद्विभक्तिस्तत्प्रकृतित्वमेव विशेषणवाचकपदे नीलपदे इति नीलपदे इति नीलपदोत्तरविभक्तेर्घटपदोत्तरवि
भक्त्यभिन्नत्वादित्यर्थः शंकते अथ विशेष्यवाचकपदोत्तराहूतिविभक्तिविभाजकधर्मवद्विभक्तिपदाहितस्य विवक्षणा
त्रदोष इति चेन्न नीलो घट इत्यत्र विशेष्यवाचकघटपदोत्तरस्मिन्नहूतिया विभक्तिविभाजको धर्मो द्वितीयात्वा
दिन्न तद्विभक्तिमत्त्वाद्याहितस्य नीलपदे सत्वात् एवं नीलपट इत्यत्र विशेष्यवाचके पदे घटपदोत्तरस्मिन्नव
र्तमानो यो धर्मो द्वितीयात्वादिस्तद्वद्विभक्तिपदाहितस्य नीलपदे सत्वान्नीलो घटः नीलघट इति द्वयोर्नीलप्रका
रकसंसर्गकघटविशेष्यकबोधः नीलस्य घटस्यादौ तत्घटपदोत्तराहूतिधर्मः प्रथमीत्वं तद्वद्विभक्त्याहितस्या
सत्वान्नताहशबोध इत्यर्थः समाधत्ते विभक्तित्वादिकमगानतः प्रकृतस्य ताहशधर्मज्ञानासंभवाच्छाब्दबो
धानुपपत्तिरिति यस्य विभक्तित्वज्ञानं नास्ति तस्यापि नीलो घट इति वाक्याच्छाब्दबोधो जायते तस्य
तस्मात् विशेष्यवाचकपदोत्तराहूतिधर्मज्ञानासंभवादित्यर्थः स्वरूपतो विरूद्धविभक्तिप
हितस्य प्रयोजकत्वं न संभवति तथा च नीलो घट इत्यत्र यदा सुपदस्यापपदत्वभ्रमो जातस्तदा

११

भेदान्वयो न जायते समस्यमानत्वमते स्वरूपतो विरुद्धविभक्तिराहित्यरूपकारणासत्त्वादिति एवं नीलस्य घट
इत्यादौ पृथक्स्थले ऽन्वयबोधो ज्ञानस्तदा नीलस्य घट इत्यत्र वाक्यान्नीलप्रकारकाभेदसंसर्गकघटविशेष्यकबोधो
जायते ऽसमस्तस्यान् विरुद्धविभक्तिराहित्यस्य स्वरूपतो ऽभावादत आह शाब्दज्ञाने सैव प्रयोजकत्वं वाच्यमिति
तत्र यस्य विभक्तिमत्तानेनास्ति तस्य तस्य बोधो न स्यादिति निरुक्तमेव सर्वं भिन्नार्थः विरुद्धविभक्तिराहित्य
ज्ञानस्येतत्पदेपि विभक्तिमत्त्वादिकमजानतः शुरूपस्य शाब्दबोधानुपपत्तिरुद्धर्तुं शंकते अपनीलो घटो
नीलघट इत्यादिद्विविधबोधसाधारणमिति स्वोत्तरत्वादिभिन्नेयत्पदे तदुत्तरत्वं यन्तन्निष्ठत्वविशिष्टं यत्स्वो-
त्तरत्वादि तद्रूपेत्यर्थः यथा नीलो घट इत्यत्र स्वं नीलपदं तदुत्तरत्वादिभिन्नं पदं घटपदं तदुत्तरत्वं यन्तन्निष्ठ
त्वं घटपदे ऽप्यत्र स्वं नीलपदं तदुत्तरत्वं च घटपदे ऽस्ति एवं नीलघट इत्यत्रापि स्वोत्तरत्वं नीलपदोत्तरत्वादि
भिन्नपदं घटपदं तदुत्तरत्वं घटपदे ऽस्ति अप्यव स्वोत्तरत्वं च नीलपदोत्तरत्वमिति स्वरूपस्याव्यवहितोत्तर
त्वसंबंधेन नीलपदवत्स्वाचैतन्न घटपदस्वरूपाकांता समासव्याससाधारणी नीलप्रकारकाभेदसंस

गीकघटविशेष्यकबोधजनकत्वमर्थः अत्र नीलस्य घट इति प्रयोगवारणाय स्वादिभिन्नेत्यत्र विशेष्यवाचकघ
टादिपदोत्तरविभक्तिवृत्तिविभक्तिविभाजकप्रथमात्वादिधर्मावच्छिन्नभिन्नत्वमर्थः तथा च नीलपदोत्तरघ
टाः प्रथमात्वावच्छिन्नभिन्नत्वान्न दोषः समायते नीलघटरूपमित्यादिवाक्यसाधारण्यानुरोधेनास्मादृशा
श्याकांक्षाया उपगतत्वात्तयोपदर्शितव्याससमाससाधारण्यानुगताकांक्षानुसरणस्य प्रयोजकत्वादिति नीले
वतन्तघटरूपं चेत्यत्र कर्मधारयस्तत्रोक्ताकांक्षाव्याससमासस्साधारणी न संभवति तथा हि स्वं नीलपदं तदुत्त
रत्वरूपस्वाव्यवहितोत्तरत्वसंबंधेन नीलपदवत्त्वं भवति रूपपदस्य घटस्वाद्यन्तं भवति तथापि स्वं नीलपदं
तदुत्तरं स्वादिभिन्नं पदं घटपदं तदुत्तरत्वमेव रूपपदे इति तदुत्तरत्ववैशिष्ट्यसामानाधिकरण्येन स्वोत्त
रत्वेनास्तीति नीलघटरूपमित्यादिसाधारणाय अन्याहृशी आकांक्षा उपदर्शितव्यासाच स्वादिभिन्न
निराकांक्षत्वप्रहेयेणबोध्या तथा च स्वोत्तरं नीलपदोत्तरं स्वाभिन्नं निपकांक्षपदं तदुत्तरं यत् ना
भिन्नत्वरूपं स्वोत्तरस्वादिभिन्नपदानन्तरत्वं जातं घटपदं तत्स्वोत्तरं स्वादिभिन्नं निराकांक्षप ॥

देनभवतिकिंतुरूपसाकांक्षमेवविशेष्यमाकांक्षाव्याससमाससाधारणीनपूर्वोक्तेत्यर्थः यद्यपिनीलघटरूपमि
त्यत्रनीलघटयोरभेदान्वयाभ्युपगमेनीलपदोत्तरंस्वादिभिन्नंपदंतदुत्तरंषष्ठ्यन्तंपदंरूपपदंतदुत्तरत्वं
घटपदेस्मिन्नप्येवस्वोत्तरत्वंनीलपदोत्तरत्वंयथास्तितथापिघटपदेस्वापेनत्वंनास्तीतिउक्ताकांक्षानास्ति तत्र
स्वाचंतघटादिपदत्वमितिसमासानुसंधीयमानस्वाचंतघटादिपदत्वमितिविवक्षणात्प्रकृताकांक्षोपपाद
नेपिनीलघटरूपमितिवाक्यात्रूपंनीलमन्यहेतिसंशयोच्छेदोजायतेसमस्तादिति घटपदोत्तरंस्वादि
विभक्त्यनुसंधानेनादरणीयमितिघटपदेस्वाचंतत्वाभावादुक्तान्नीलघटयोराकांक्षाभावादन्वयोना
स्ति किंतुनीलरूपयोरेवाभेदान्वयोवक्तव्यःसोपिनसंभवतिस्वोत्तरंनीलपदोत्तरंयत्स्वादिभिन्नंपदंघ
टपदंतदुत्तरेरूपपदेस्वोत्तरस्वादिपदभिन्नपदोत्तरत्वाभाववैशिष्ट्यंनास्तीतिप्रकृताकांक्षाविलया
पत्तिरिति वाच्यमितिगंगारामजडचरणाःनचस्वोत्तरस्वादिभिन्नत्वनिप्रकांक्षपदानुत्तरत्वविशि
ष्टस्वोत्तरत्वरूपस्वाव्यवहितोत्तरत्वसंबंधेननीलादिपदवत्स्वाचंतघटादिपदत्वमेवसमासस्या

व्यु.टी
१३
13

समाधारणीयभेदान्वयबोधोपयिकाकांक्षाऽस्तीति चेन्न सिद्धान्तिमते सकलसमासे विशेष्यवाचकपदाव्यवहितपू
र्ववर्तिविशेषणवाचकपदत्वं विशेषणवाचकपदाव्यवहितोत्तरवर्तिविशेष्यवाचकपदत्वं वाकांक्षा। एवं स
कलव्यासे प्रथमान्तविशेष्यवाचकपदसमभिव्याहृतप्रथमान्तविशेषणवाचकपदत्वमाकांक्षा इत्याकांक्षाद्वै
विध्येपि विशेष्यविशेषणोभयोनिश्शाब्दानुगमसंभवात्। पूर्वपक्षिणस्तु शब्दाद्यनुगमस्याप्यभावात्। स्तोनरेखादिभि
न्नेति पक्षोक्तेपदेतदनेरयत्वतन्नास्तिन्नवरूपेपन्नोत्तरस्वादिभिन्नपदाऽउत्तरत्वेन द्विविधेत्यत्रभेदकूट।
निवेशेन गौरवात् दुर्विज्ञेयत्वाच्च। सर्वानुगमेन सिद्धान्तिमतस्यैवोचितत्वात्। अथ नीलं घटमानयेत्यादौ
नीलाद्घटादावन्वयोपगमे नीलादिपदोत्तरविभक्त्यर्थस्यैकमत्वादेः कुत्रान्वय इति चेदिति सामान्य
तेन कुत्रापीति पदसाधुत्वाय प्रयुज्यमानाविभक्तिर्निरर्थकेति भावः। संभवत्यर्थसाधुत्वेपरसा
धुत्वमन्याय्यमित्यभिप्रायकं मतान्तरमाह अभेद इत्यारभ्य वदन्तीत्यन्तेन। नीलो घट इत्यादौ
नीलपदोत्तरयौगिकभेदाभाववत्त्वात् घट इति बोधात् विशेषणविभक्तेरभेदोऽर्थः तथाभेदोना

नमतेइत्वनीः चीनमतेराज्ञाभावव्याप्यराजस्वत्वाभाववान्पुरुषइत्यादिवाधाभावानिवेशादित्यर्थःप
लितितिराज्ञः पुरुषइत्यादौराजस्वत्वाभाववान्पुरुषइत्याद्यन्वयवोधोपगमेराज्ञीयंस्वत्वंराजवत्त्वंत्वमिति
स्वत्वोदेश्यिकाराजविधेयिकानुमितिरेकाराजस्वत्ववान्पुरुषइतिराजस्वत्वविधेयिकापुरुषोदेश्यिका
नुमितिर्द्वितीयाइतिद्विविधानुमितेरेवतदतिरिक्तविषयकत्वेन॰ राजस्वत्ववान्पुरुषरूपशाब्दबोधविष
यातिरिक्ताविषयकत्वेनसमानविषयकत्वेनानुमितेर्द्वैवलतयाराजकीयंस्वत्वंराजस्वत्ववान्पुरुषइत्या॰
कारकद्विविधानुमितिंप्रतिप्रत्येकमेकामेकानुमितिंप्रतितादृशवाक्यघटितसामग्र्याः राज्ञः पुरुषइति
वाक्यघटितयोग्यताज्ञानवाधाभावादिसामग्र्याः प्रतिवंधकताद्वयंप्रतिवध्यभेदेनप्रतिवध्यताद्वयं
प्रतिवध्यभेदेनप्रतिवध्यताद्वयनिरूपितप्रतिवंधकताद्वयमित्यर्थः समन्वयेच॰ स्वत्वसंसर्गतावा
दिप्राचीनमतेचतादृशानुमित्योः राजकीयंस्वत्वंराजस्वत्ववान्पुरुषइत्यनुमित्योः तथाविधवाक्य
जन्माराजकीयपुरुषइत्यादिशाब्दबोधादतिरिक्तविषयकतया॰ राज्ञः पुरुषइतिवाक्यजन्मात्

व्यु॰टी॰
९९
66

राजावान्पुरुषइतिशाब्दबोधात् अतिरिक्तविषयकतयाशाब्दबोधेराजापुरुषश्चेतौविषयौराजकीयस्व
त्वंराजवान्पुरुषइत्यनुमितौराजापुरुषश्चविषयौस्वत्वंचाधिकंविषयइत्यनुमितौरधिकविषयत
याभिन्नविषयेऽनुमितिसामग्र्याः बलवत्त्वेनानुमितिरेवजायतइति॰ तत्रराजकीयंस्वत्वंराजस्वत्व
वानित्यनुमितेः तादृशसामग्र्याःराजवान्पुरुषइतिशाब्दजनकराज्ञःपुरुषइतिवाक्यघटितयोग्य
ताज्ञानादिसामग्र्याः प्राचीनमतेप्रतिबंधकत्वकल्पनंनास्ति॰ नवीनानांमतेराजस्वत्ववान्पुरुषइतिशा
ब्दविषयराजस्वत्वपुरुषविषयकत्वेनराजवत्स्वत्वंराजस्वत्ववान्पुरुषइत्यनुमितेः समानविषयकतया
दुर्बलत्वेनशाब्दसामग्रीप्रतिबंधकताकल्पनमधिकमितिभावः ननुप्राचीनमतेपिराजपुरुषयोःसंसर्गत
यास्वत्वंचविषयाः इत्युक्तानुमितेःसमानविषयकतयाशाब्दसामग्रीप्रतिबध्यत्वमस्त्वसमेतिचेन्न-
शाब्दबोधेराजापुरुषःसंसर्गतयास्वत्वंविषयाः अनुमितौतुराजापुरुषौस्वत्वेस्वत्वसंसर्गश्चा
धिकइत्यतिरिक्तविषयकत्वेनानुमितेः प्राचीनमतेशाब्दसामग्र्यप्रति [illegible]ः

९९

वच्छत्वेनलाघवादितिभावः यद्वाविषयपदेनात्रप्रकारविशेष्यावेववक्षितौतेननसंसर्गाधीमिनदोषः तथाविधा
नुमितिस्तथाविधशाब्दसामग्र्योःसत्वेअनुमितेरेवोत्पत्तेरिति· राजकीयंस्वत्वंराजस्वत्ववान्पुरुषइत्य
नुमित्योःसामग्रीसत्वेराजवान्पुरुषइतिशाब्दसामग्रीसत्वेच अनुभवबलादनुमितेरेवोत्पत्तेर्नानुमिति
प्रतिशाब्दसामग्रीप्रतिबंधिकेतिप्राचीनमतेलाघवमितिभावः यद्यप्यत्रराजवत्स्वत्वंराजवत्स्वत्वंराजस्वत्व
वान्पुरुषइत्यनुमितौ एवानुभवसिद्धेनतदानुमितिसामग्र्योःशाब्दंप्रतिप्रतिबंधिकेइतिप्रतिबंधकभेदात्
प्रतिबंध्यप्रतिबंधकभावद्वयेनतथापिराजवान् पुरुषइतिशाब्दंप्रतिशाब्दविषयभिन्नविषयकानुमि
तिसामग्रीत्वेनसामग्र्योरेकमेवप्रतिबंधकत्वमितिध्येयं· अपितुराजवान्पुरुषइत्याकारकस्वत्वसंसर्ग
क एक विधानुमितिंप्रत्येवतादृशसामग्र्याः पजवानपुरुषइतिशाब्दंजनकाराज्ञःपुरुषइतिवाक्य
त्वदिनयोग्यताज्ञानादिसामग्र्याः प्रतिबंधकत्वमेकंकल्पनीयमितिप्राचीनमतेलाघवमितिभावः
स्वत्वप्रकारत्वावादिनवीनः प्रतिबंधकत्वमतंघवस्थापपत्तिभवन्मतइत्यादिना· भवन्मतेस्वत्वसंसर्ग·

व्यु॰टी॰ ६७ संसर्गतावादिप्राचीनमते॰ पत्रयादनुमितिः स्वीक्रियते॰ अस्मन्मतेऽपि स्वत्वप्रकारतावादिनवीनमतेऽपि तत्र
तादृशानुमितेः स्वीकरणीतया यत्र राज्ञः पुरुष इति सामग्रीकाले प्राचां पादृशी राजवत्स्वत्वं राजस्वत्ववानु पु
रुष इत्याकारिकानुमितिः स्वीक्रियते तत्र राज्ञः पुरुष इति स्वत्वप्रकारकशाब्दसामग्रीकाले राजवत्स्वत्वे
राजवत्स्वत्वं राजस्वत्ववान्पुरुष इत्यनुमितिः नवीनेनापि स्वीक्रियते इति नव्यमतेऽपि अनुमितिं प्रति न शाब्द
सामग्रीप्रतिबन्धिकेति मतद्वये साम्यमित्यर्थः स्वत्वसंसर्गकराजवान्पुरुष इति समानविषयकानुमितिं प्रति
यथा प्राचीनमते राज्ञः पुरुष इति वाक्यघटितस्वत्वसंसर्गकराजप्रकारकयोग्यताज्ञानादिशाब्दसामग्रीप्र
तिबन्धिका तथा नवीनमतेऽपि राजवान्पुरुष इति भिन्नविषयकानुमितिं प्रत्यपि स्वत्वप्रकारकशाब्दजन
कराज्ञः पुरुष इति वाक्यघटितस्वत्वप्रकारकयोग्यताज्ञानादिरूपशाब्दसामग्री मणिसंवादिमायन
प्रतिबन्धिका इति यत्र प्राचीनेन त्वयाऽनुमितिर्न स्वीक्रियते तत्र नवीनेन मयाप्यनुमितिर्न स्वीक्रियते इ
त्यनुमितौ शाब्दसामग्र्याः प्रतिबन्धकतासाम्यादित्यर्थः राजवत्स्वत्वे राजस्वत्ववान्पुरुष इत्यनुमि।

६७

मितिद्वयस्य भयमतेपि ज्ञापतेरस्य भयमते पि न शाब्दसामग्री प्रतिबंधिकेति साम्यम्· इदमुपलक्षणं यत्र
स्वीक्रियते ऽनुमितिः प्राचा तत्र नव्येनापि न स्वीक्रियते इत्यस्वीकारेपि साम्यमित्यर्थः यत्र याद्दश तत्र ताद्दश
सामग्र्यं यदैकक्रमवर्त्यस्य दृश्यति उपदर्शितमूले इत्यादिना- राजवत्स्वत्वं राजसमवायानुरूपं यस्यानुमितिद्व
येभवद्भिः प्राचीनैः स्वीक्रियते तदनुमितिद्वयमस्माभिर्नवीनैः स्वीक्रियते इति कुतो हेतोरनुमितिद्वयेति
ह्यप्रतिबध्यतानिरूपितशाब्दसामग्रीनिष्ठप्रतिबंधकताद्वयं संभवेत् उक्तानुमितिद्वयास्वीकार एव हि
शाब्दसामग्र्याः प्रतिबंधकताद्वयापादकोनुमितिद्वयस्वीकारे तत्कारणाभावादेव प्रतिबंधकताद्वयापा
दनं त्वेतुष्यवदिति भावः नतु प्राचीनमते भिन्नविषयकतया ऽनुमितिसामग्र्याः प्राबल्यमित्यनुमितिरेव
न शाब्दबोधः इति शाब्दसामग्र्याः अनुमितिप्रतिबंधकत्वं नास्तीति वाच्यं नवीनमते तत्समानविष
यकतया ऽनुमिसामग्रीईबलेति अनुमितिर्न भवतीत्यनुमितिं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वं ९
कल्पनीयमिति गौरवमिति मतत्रयादृ· भवतापि नादृशशाब्दप्रतीति- प्राचीनेनापि- नादृशशा

बु·टी·
६८
68

ब्दंपत्तिः· राजवान्पुरुषइतिशाब्दप्रतिः· राजकीयस्थलेराजस्वत्ववान्पुरुषइत्यनुमितिद्वयसाम
ग्रीदशायांप्रतिबंधकतायावाच्यतयातासम्भवाद्वेति· प्राचीनमतेशाब्दबोधोनजायतेइतिशाब्दप्रत्यनुमि
तिद्वयसामग्रीद्वयंयथाप्रतिबंधकंतथानवीनमतेपिशब्दानुमितिर्नजायतेऽत्यनुमितिद्वयंप्रतिशा
ब्दसामग्रीप्रतिबंधिकेतिमतद्वयेपिसाम्यमित्यर्थः· अत्रैतच्छाब्दप्रतिद्विविधानुमितिसामग्र्योरेतच्छा
ब्दबोधविषयभिन्नविषयकानुमितिसामग्रीत्वेनैवकाप्रतिबंधकताप्राचीनमते· एवंराजवान्पुरु
षइत्यनुमितिंप्रतिराजवान्पुरुषशाब्दसामग्रीत्वेनप्रतिबंधकतानवीनमतेबोध्या· अथनवी
नोभ्यूपः प्राचीनमतेदूषयति· एवंराजपुरुषइत्यादिसमासवाक्यादित्यादिनातादृशशाब्दसा
मग्र्याः स्वलसंसर्गकराजप्रकारकपुरुषविशेष्यकशाब्दबोधजनकराजपदाव्यवहितोत्तरपु
रुषपदज्ञानजन्योपस्थित्यादिघटितसामग्र्याः तथाविधतात्पर्यज्ञानादिघटितायाः चरविषयक
प्रमत्वादिकप्रतिबंधकताधिक्येनगौरवात्तद्धेतोः तत्रराजपुरुषइतिसमासेराजसंबंधिनोऽभे·

६८

दान्वयबोधउचितः नचभवन्मतेपिराजसंबंधाभेदान्वयबोधादिनमतेपिराजसंबंधाभेदान्वयबोधसामग्र्याः
प्रतिबंधकत्वापत्तिकोनयोरेवंसमानमितिवाच्यं - प्राचीनमतेपिराजपदस्यराजसंबंधिनिस्वारसिकिलक्षण
ग्रहकालेअभेदसंबंधेनराजसंबंधिविशिष्टपुरुषरूपेणार्थग्रहसत्वेभवन्मतेपितत्संसर्गतावादिप्राचीन
मतेपि - कर्मधारयतेनाभिमतात्राजपुरुषइत्याकारकात्तथाविधसमासवाक्यात्तादृशबोधस्वीकारस्यरा
जसंबंधाभेदबोधस्वीकारस्यावश्यकतयातादृशसामग्रीप्रतिबंधतायाः अभेदसंबंधेनराजसंबंधिप्रकारक
पुरुषविशेष्यकशाब्दबोधजनकराजपुरुषइतिसमासवाक्यघटितयोग्यताज्ञानादिसामग्रीप्रतिबंधकत्व
घानवीनप्राचीनोभयमतसिद्धत्वादित्यर्थः राजपुरुषसमासेराजपदेराजसंबंधितिलक्षणानवीनमते
निरूढलक्षणास्वारसिकीस्वेच्छाधीनाप्रयोजनवतिलक्षणातुप्राचीनमतेपिसंभवतीति अथचराज
पुरुषइत्यत्रप्राचीनमतेविभक्त्यर्थस्वत्वादिसंसर्गकशाब्दबोधजनकसमासत्वेनतत्पुरुषत्वमितिल
क्षणान्नतत्पुरुषः यदात्वराजपदस्यराजसंबंधिनिस्वारसिकलक्षणातदापदार्थद्वयाभेदबोधकस

वु॰टी॰ ६५

69

मास्तं कर्मधारयत्वमिति लक्षणात् कर्मधारयसमासः नवीनमते पञ्चवाक्यावस्थायां समासाव-
स्थायां चाभेदबोधस्तत्र कर्मधारये यथा नीलमुत्पलं नीलोत्पलमित्यत्र । राज्ञः पुरुष इति वाक्या-
वस्थायां राजसंबंधवान् पुरुष इति भेदबोधः निपातातिरिक्तनामार्थयोरभेदान्वयनियमबला-
द्राजसंबंधिनि निरूढलक्षणा न देयं भेदबोधेपि न कर्मधारयसंज्ञा वाक्यदशायां भेदबोधवत्तन्नवीन-
मते हूषपि तंपतइस्मारभ्यतदसदितंतेमतमुपन्यस्तनियतितितंदधिपश्येमत्रलक्षद्वितीयास्मर-
णेन कर्मत्वमुपस्थाप्यते दधि निष्ठकर्मता निरूपकदर्शनाश्रयत्वमिति शाब्दधीरेव राजपुरुषइ-
त्यत्रलक्षषष्ठीस्मरणेन संबंधबोधः तथा च राजनिरूपितस्वत्वाश्रयः पुरुष इति बोधः एवं संबं-
धिनिरूढलक्षणास्वीकारे साभेदान्वयांगीकारोऽनर्थकः शक्तत्वेन चेति । रहस्य राजमातंगाद्यापत्तिः
राजसंबंधवंतो मातंगा इत्यन्वयबोधार्थः राजपदोत्तरलुप्तषष्ठीस्मरणमावश्यकमतः समानविभक्ति-
कत्वेन राजपदाभ्यामभेदबोधःस्यादित्यर्थः समासे यतस्तत्रत्वं स्वराज पुरुष इति वाकोऽस्तु राजादीना

मभेदात्वयात्तुयपत्यानामिघन्त्यानामप्रयोगाइतिप्रामाणिकानांऋद्धस्यराजमातंगाइत्यस्याप्रयोगे
ऽभेदात्वयात्तुपयतिर्निकारणम्॰ समानविभक्तिकऋद्धराजपदाभ्यामृद्धस्यराज्ञोमातंगाइत्यत्रापि
योग्यतयाऽभेदात्वयोबोध्यतांनाम॰ अपितुसमासघटकपदसापेक्षतयाराजपदस्यासामर्थ्याकृति
देशात्समासासाधुत्वेनेति॰ समर्थः पदविधिरितिसूत्रेणसमर्थानामेव॰ परस्परसाकांक्षाणा
मेवसमासोविहितः सामर्थ्यंसमासेएकार्थीभावलक्षणमेकार्थीभावश्चविशिष्टैकार्थविशेष्यक
बोधजनकत्वमिति॰ नन्वत्रयथवत्वदिरोहिन्नापंचसात्वोऽस्त्वाव्याप्तेः किंतुसमासघटकपदनिरा
कांक्षत्वेसतिपरस्परसमासघटकपदसाकांक्षत्वंसमर्थत्वं॰ ऋद्धस्यराजपुरुषइत्यत्रसमासघट
कऋद्धपदसापेक्षतयाराजपदस्यासामर्थ्यानिर्देशात्॰ सापेक्षमसमर्थवद्भवतीत्यतिदेशबलात्तत्
श्चाचऋद्धस्यराजपुरुषइत्यत्राभियुक्ताभ्युपगतसमाससाधुत्वनिर्वाहार्थोयातसमासाघटकपदनि
रकांक्षत्वरूपविशेषणबललंभ्यसमासासाधुत्वमितिदेशिकंगौणं॰ अतिदेशेहितुल्यव्यवहारःयथागोर

मु॰टी॰
७॰
70

षः पुरुषो हस्तीति निराकांक्षाणां समासोऽसाधुत्वमेवं पित्रुक्षिमवगन्तव्यमिति॰ एवं च सद्धस्य राजमातंगास्य
स्या प्रयोगे समासासाधुत्वमेव हेतवित्यर्थः तदुक्तं सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगो नेति
विशेषणसहितानां विशेषणानामेव वृत्तिर्न तु सविशेषणानां विशेष्याणामपि॰ तेन सवि-
शेषणानां मातंगानां राजरूप विशेषणेन सह समासः उपपन्नः एवं वृत्तस्य विशेषणस्य विशे
षणतायोगो नेत्यर्थः न वृत्तस्य विशेषणस्य तेन भद्रा राजमातंगाः इत्यत्र भद्र विशेषणसमातं
गे विशेषेऽन्वयः ‥ ‥ समासघटके स्यैतदभिधायकमेव सविशेषणस्य राजपदस्य विशेष
णस्य तेन ऋद्धा राजमातंगाः इत्युपपत्तिः सद्ध विशेषणयुक्तधारातो विशेषणस्य समासरूपा
वृत्तिर्न॰ एवं वृत्तस्य समस्तस्य राज्ञो विशेषणस्य ऋद्धस्येति विशेषणयोगोपि नेति तदर्थः तत्सा
पेक्षत्वं च तदर्थान्वितस्वार्थपरत्वं समासघटक ऋद्धपदार्थान्वितो वः स्वार्थो राजपदार्थस्तत्र
परं तामपेयस्य तत्तदर्थान्वितस्वार्थपरं राजपरं न तु राजपदे क्लि॰ स्वार्थस्य स्वीयत्व ॥

तिग्रहविशेष्यःस्वराजपदंतच्छक्तिग्रहोराजाराजपदशक्यइत्याकारकोतद्विशेष्योराजातत्पदंऋद्धप
दंतदर्थान्वितःस्वार्थोराजपदार्थःसचराजपदशक्तिग्रहविशेष्यइतिराजपदसमासघटकऋद्धप
दसापेक्षंभवतीतिराजपदस्यासामर्थ्यात्समासासाधुत्वं। अतएवतदर्थान्वितस्वार्थपरत्वमित्यत्रस्वा
र्थपदेनस्वीयवृत्तिग्रहविशेष्यइत्यर्थकरणादेवशरैः शातितपत्रः चैत्रस्यदासभार्येत्यादौनसमस्यमा
नशातितदासपदार्थैः सापेक्षत्वात्तदर्थैकदेशातनदासत्वादावेवशरकरणकत्वचैत्रनिरूपितत्वा
दिनामन्वयादितिमूलंतत्पदंसमासघटकतृतीयाषष्ठ्यंतंतदर्थः शरकरणकत्वंतदन्वितस्वार्थः शा
तितपदशक्तिग्रहविशेष्यः शातनकर्मपत्रादिकंनभवतिकिंतुशातितपदार्थैकदेशशातनक्रियै
वभवतिशरकरणकत्वंनतृतीयाशातनेनक्रियातत्कर्मपत्रेपस्समइत्यर्थात् एवंचैत्रस्यदासभार्ये
त्यत्रतत्पदंसमासघटकपदंचैत्रस्येतिषष्ठीपदंतदर्थोनिरूपितत्वंतदर्थोनिरूपितान्वितःस्वा
र्थः दासपदशक्तिग्रहविशेष्योदासोनभवतिकिंतुदासपदार्थैकदेशोदासत्वंसेवारूपंचैत्र

सु.टी.
७१
71

निरूपितत्ववद्दासत्वं तद्वतो भार्येत्यर्थात् तेन न समेस्यमानशातितदासपदादेः समासाघटक
शरैरिति चैत्रस्येतिपदसापेक्षत्वेनासमर्थत्वात्समासो न स्यादित्यर्थः तदर्थान्वितेतत्त्वाभेदान्व
योवान्निवेशनीय इतीति तदर्थे समासाघटकस्य हृपदार्थे अभेदसंबंधेनान्वितोपः स्वार्थः राज
पदार्थो राज्ञा न तत्परत्वं राजपदेः स्त्रीति समासाघटकपदसापेक्षतया राजपदस्यासामर्थ्यात्समा
सो न स्यादित्यर्थः शरैः शातितपत्र इत्यत्र समासाघटकशरैरितिपदं तत्पदं तदर्थः शरकरणकत्वं-
तत्र शरकरणकत्वे अभेनान्वितः स्वार्थः शातितपदार्थैकदेशः शातनं न भवति शातनं शरकर
णकत्वरूपं न भवति किं तु शरकर्तृत्ववद्वतीति न समासाघटकपदसापेक्षत्वेनासामर्थ्यात्समा
सो न स्यादित्यर्थः एवं चैत्रस्य दासभार्येत्यत्रापि चैत्रनिरूपितत्वे दासस्याभेदो नास्ति किं तु चैत्रनिरू
पितदासत्ववतो भार्येत्यर्थान्न दोषः अस्मिन्पक्षे स्वार्थपदेन स्वीयपक्षे तिग्रहविशेष्यो न ग्राह्यः किं
तु हृतिग्रहविषयोपस्थापकस्य प्रकारो वा विशेष्यो वा ग्राह्यः इति स्वादीनां मतं ॥

७१

रूषयति॰ राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्रहस्थलानुरोधेन॰ तादृशसमभिव्याहारज्ञाना
देः राजपदाव्यवहितोत्तरपुरुषपदज्ञानादेः तथाविधजनकतायाः संबंधीपुरुष इति बोधजनकता
याः क्लृप्तत्वात् सिद्धत्वात् तत्र राजपुरुषघटकराजपदे निरूढलक्षणास्वीकारे गौरवादिति॥ अत्रायं
भावः राजसंबंधीपुरुष इति बोधे राजपुरुष इत्यानुपूर्वीविशेषरूपसमभिव्याहारज्ञानं कारणं स्या
त् पदजन्यपदार्थोपस्थितिः सहकारिणी हृतिश्च शक्तिः शक्यसंबंधरूपा लक्षणा च तत्र शक्तिलक्षणा
न्यतररूपवृत्तिज्ञानस्य पदार्थोपस्थितिद्वारा शाब्दबोधं प्रतिकारणतायां लक्षणानिष्ठस्वारसिकत्वनि
रूढत्वज्ञानमपि कारणं न भवति येन गौरवं भवेदिति स्वारसिकत्व निरूढत्वविशिष्टलक्षणाज्ञानं
कारणमिति शंक्यते॰ नचेति स्वारसिकलक्षणाग्रहस्थले तादृशान्वयबोधस्य राजसंबंधीपुरुष इत्यन्व
यबोधस्य नवीनप्राचीनोभयमतसिद्धत्वेपि॰ निरूढलक्षणामते॰ निरूढलक्षणावादिनवीनमते॰
संबंधतात्पर्यस्य॰ राजपदस्य राजसंबंधीबोधे तात्पर्यस्य॰ ज्ञानादित्वकल्पनागौरवमिति॥ स्वस्व

कः रसः इच्छातदधीनाललक्षणालक्षणास्वारसिकीछक्षणाएवंअनादितात्पर्यैवक्तरिच्छातद्विष
यीभूतोर्थोराजसंबंधीतनिष्ठाशक्यसंबंधरूपालक्षणानिरूढलक्षणा॰ एवंचस्वारसिकनिरूढयोर्ल
णयोःसामेपिनिरूढत्वलक्षणाघटकतात्पर्यअनादित्वंविशेषणमधिकमितिगौरवमित्यर्थः तथाचरा
जपुरुषइत्यत्रलुप्तविभक्तिस्मरणेनराजस्वत्ववान्पुरुषइतिबोधः संभवितोनतन्निरूढलक्षणा
याः भेदसंबंधेनराजसंबंधीपुरुषइतिबोधयतिशंकाशयः इतिसमाधत्ते॰ राजपुरुषइत्यादिवाक्यज
न्यशाब्दबोधात्पूर्वंनियमतोलुप्तविभक्तिस्मरणकल्पनापेक्षयातात्पर्यानादित्वकल्पनायांगौरवविरहा
दितिइतिनियमतः तादृशशाब्दबोधकार्यात्पूर्वकालेकारणीभूतंलुप्तविभक्तिस्मरणंकल्पनीयं-
पदापदार्थं॰शाब्दबोधस्ततःपूर्वंतत्क्षणेलुप्तविभक्तिस्मरणमितिनियमतः अनेनाविभक्तपद॰ सुश्रोसत्राम
रूपाराज्ञः राज्ञोः राज्ञोवापुरुषइतितात्पर्यवशाच्छाब्दबोधसंभवात॰ नपुंसकात्स्वयोर्लुगितिसूत्रेणाने
नाःविभक्तिलोपाः तासामनंतानिस्मरणानितेषांचसंबंधोपस्थितिप्रमनंतानिकारणत्वानिकार ।ः

णताशरारंचानन्वयव्याप्तिस्वरूपनियमघटितत्वात्तात्तिगुरुः· तद्वयोरेवंतन्तस्तविभक्तिस्मरण
कल्पनाधीनमित्यभिमेयोक्तेलाघवविभक्तिस्मरणकल्पनापेक्षयेति· तात्पर्यानादितकल्पनायांगौरवरह
दितीतितात्पर्यविषयीभूतार्थंशाक्यसंवंधरूपालत्तणासिद्धैवतात्पर्यपरमनादितरूपधर्ममात्रकल्प
नेस्वयिकेपूर्वमतेतल्लाघवविभक्तिस्मरणादयोधर्मिणोधर्माश्चकल्पनीयाइतिधर्मिकल्पनातोधर्मक
ल्पनालघीयसीतिनतात्पर्यनादित्वकल्पनेगौरवमितिभावः तात्पर्यैः नादित्वेचतज्ज्ञानजन्यशाब्दबोधं
समकालीनस्वज्ञानजन्यशाब्दबोधत्वव्यापकत्वे· तत्तात्पर्यंतज्ज्ञानजन्योयः शाब्दबोधः तज्जन्यसंवंधीपुरु
षइतिशाब्दबोधः तद्धसमकालीनस्वज्ञानजन्यत्वंतात्पर्यंतज्ज्ञानजन्यशाब्दबोधत्वव्यापकंशाब्दबोधया
वत्पस्यस्वस्यतात्पर्यस्ततत् तात्पर्यस्वज्ञानजन्यशाब्दबोधत्वसमकालीनस्वज्ञानजन्यशाब्दमात्रव्यापकत्वंतत
त्वंतात्पर्यैः स्वीयत्वः अत्रतात्पर्येचैत्रीयमैत्रीयविशिष्टेननाप्तुं किंतुतात्पर्यत्वेनतात्पर्यमात्रं·
ग्राह्यः· तथाचतात्पर्यज्ञानजन्यः सर्वोपिशाब्दबोधः एवंपूर्वतात्पर्यज्ञानजन्यापिशाब्दबोधाः

यात्वहं सकालीनो भवतीति सर्वमपि तात्पर्यं स्वज्ञानजन्यशाब्दबोधं हं सकालीनस्वज्ञानजन्यशाब्दबो
धसामान्यकं भवति: स्वारसिकलक्षणास्थले तु चैत्रीयप्राथमिकतात्पर्यज्ञानजन्यप्राथमिकः शाब्दबोधः
चैत्रीयप्राथमिकतात्पर्यज्ञानजन्यशाब्दबोधः इंसकालीनो न भवतीति अनादित्वं नास्ति· निरूढलक्षणा
स्थले तु सर्वेऽपि तात्पर्यज्ञानजन्यशाब्दबोधाः पूर्वपूर्वतनतात्पर्यज्ञानजन्यशाब्दबोधध्वंसकालीना: भ
वंत्येवेति तात्पर्यस्यानादित्वमस्ति· अत्र प्राथमिकत्वं कस्मिन्नपि तात्पर्ये नास्ति पूर्वपूर्वतनतात्पर्यसत्वा
दिति भावः यत्र राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्रहस्तत्र तादृशबोधस्य· राजसंबंध्यभिन्नपु
रुष इति बोधस्य उभयमतसिद्धत्वात्· तादृशसमभिव्याहारस्य राजपुरुष इति समभिव्याहारस्य· रा
जसंबंधिपुरुषत्वबोधे कारणताया मतद्वयेऽपि निर्विवादत्वेन तत्र लुप्तविभक्तिस्मरणकल्पने मानाभावा
दिति केचित्तन्मते उक्तो लिंगः पाठः· सच गतार्थत्वात्पुनरुक्तः तस्मा राजसंबंधिन उपस्थितिं विना राजपु
रुष इत्याकारकसमभिव्याहारमात्रेण राजसंबंध्यभिन्नः पुरुष इति शाब्दबोधासंभवाद्युक्तः इति नैव

मितिपर्यवसन्नविभक्तिस्मरणं विनैव निरुक्तलक्षणायां निर्वाहे स्यादर्थः यावत्त्वेन दर्शनेन समं तस्य दधिकर्मकरणाभे
दान्वयस्य मनात्तत्रापि दधिपदे पि लुप्तविभक्तिस्मरणं न कल्पनीयमिति शंकाशयः समाधत्ते दध्यादिपदस्य दधिकर्म
कादौ लक्षणाग्रहे तस्य दधिपदस्य द्वितीयेतराविभक्तिः प्रथमा तृतीयादिः तद्भ्रमदशायां दधिकर्मपश्यतीत्यादि
वत् उक्तस्थलेपि दधिपश्यतीत्यत्रापि प्रथमा तृतीयां तत्रभ्रमदशायां दधिकर्मकदर्शनबोधानुदयात् दधिपदस्य
दधिकर्मके लक्षणा तत्र च प्रथमा तृतीयादिभ्रमे दधिकर्मकः पश्यति दधिकर्मकेन पश्यतीत्यादाविव दधिपश्यतीत्युक्त
स्थलेपि दधिकर्मकदर्शनान्वयबोधानुदयात् हेतोः द्वितीयां तदध्यादिपदसमभिव्याहृतपश्यतीत्याद्युपस्थिति
त्वेन दधिकर्मकदर्शनान्वयबोधं प्रति हेतुतायाः आवश्यकत्वात् दधिपश्यतीत्यादौ लुप्तद्वितीयानुसंधान
स्यावश्यकत्वात् दधिपश्यतीत्यत्रेव पचनपुरुषइत्यत्रापि न विभक्त्यनुसंधानावश्यकत्वं राजसंबंधिपुरुषः इति बो
धं प्रति राजपदाव्यवहितोत्तरपुरुषपदवत्ताज्ञानत्वेन कारणत्वात् तृतीयां तत्रभ्रमस्थले तत्तृतीयया व्यवधाना

सु·टी·

७४

74

त्. राजपदाव्यवहितोत्तरं त्वंपुरुषपदेनास्तीतिकारणाभावादेवनराजसंबंधीपुरुषइतिबोधापत्तिरितिनषष्ठ्यनु
संधानापेक्षेत्याहराजसंबंधिपुरुषइत्यादिबोधेचेत्यादिना· राजपुरुषइत्यादावविवद्धिपश्यतीत्यादौदधिपदाव्य
वहितोत्तरपश्यतिपदत्त्वानत्वेनकारणतानसंभवतिपश्यतिदधीपश्यतिचैत्रोदधिइत्यादौव्यभिचारान्नस्याद्वि
तीयानुसंधानमावश्यकमित्याहदधिपश्यतीत्यादौदधिपदाव्यवहितोत्तरत्वप्रकारकथात्वपदत्त्वानसहेत्वना
यास्त्वस्मन्नादिति· शंकतेतंदुलंपचतीत्यादौइत्यारभ्यइतित्वचीतनीयमित्यंतेनग्रंथेन· नातिप्रसंगइतितंदु
लंपचतीत्यत्रतंदुलकर्मकबोधेद्वितीयासमभिव्याहारोनियामकः पत्तपुरुषइत्यत्रराजसंबंधिपुरुषइतिबो
धेषष्ठीसमभिव्याहारोनियामकइतिद्वितीयादिसमभिव्याहाराभावात्तंदुलःपचतीत्यत्रनतंदुलकर्मकेतंदुलपदे
लक्षणेतिनातिप्रसंगइत्यर्थः केवलप्रकृतिप्रयोगोऽस्तितंदुलःप्रमेयइत्यत्र· केवलप्रकृतिप्रयोगोनास्तीतिप्रकृ
तौलक्षणानप्रत्ययेइत्यतउक्तंविभक्तेरेवप्रकृत्यर्थविशेषितस्वार्थेतंदुलकर्मकलक्षणेतितन्नसंभवतीति· समा ७४

यत्रे॰ राजादिपदस्य राजसंबंध्यादिशक्तताश्रमदशायामिव तत्तदर्थलक्षणायामहदशायामपि राजसंबंधिनः पुरुषस्यादा
वपि राजसंबंधीत्यादावन्वयबोधस्य सर्वानुभवसिद्धत्वादिति॰ शक्तिभ्रमस्य लेसा ऽसिकलक्षणायां वा राजपदस्य राजसं
बंधिन्यर्थः यथा स्वसंबंधोऽर्थः तथा च राज्ञः पुरुषस्यत्र राजसंबंधिसंबंधवानिति बोधो यथाः संबंधबोधकताव
च्छेदकत्वे निरर्थकत्वं नास्तीत्यर्थः राजसंबंधिनः पुरुषस्य इति दृष्टांतः राजसंबंधिपदोत्तरषष्ठ्याः संबंधोऽर्थः राजसंबंधि
संबंधवान्पुरुष इति बोधात्॰ पचति चैत्र इत्यत्र कृतिसंबंधेन याकवाश्चैत्र इति धीः नपचत्यत्र कृतिसंबंधावच्छि
न्नप्रतियोगिताकपाकाभावनांश्चैत्र इति शाब्दबोधो बोधो वक्तव्यः स च न संभवति कृतेर्नञ्त्वनियामकत्वात्तस्मतः
कृतिराख्यातार्थः आश्रयता च वृत्तिनियामकः संबंध इति पाकानुकूलकृतिमांश्चैत्रः इति बोधः न पचति इत्य
त्राश्रयतासंबंधावच्छिन्नकृत्यभावनांश्चैत्र इति बोध इत्याह पचति चैत्र इत्यादावन्पीत्यादिना॰ पुनः शंकते॰ ग्रंथैमिरा
भ्यचेदिसनेन ग्रंथेन॰ एवमपि कृतिसंबंधस्य वृत्त्यनियामकत्वान्नपचति चैत्र इत्यत्र शाब्दबोधानुपपत्त्याऽऽख्यातस्य

व्यु॰टी॰
७५
75

कृत्यर्थकत्वपास्यार्थक्योपपादनेपि । चैत्रो न जानातीत्यत्र ज्ञप्तिनियामकाश्रयतासंबंधावच्छिन्नप्रतियोगिताकज्ञानाभा

वस्यैव चैत्र इति बोधसंभवादाख्यातस्याश्रयत्वार्थकत्वं निर्युक्तिकमित्यर्थः । न च यथा तत्र ज्ञानादेरिति । साक्षादित्याश्र

यत्वरूपमाख्यातार्थमङ्गीकृत्य यथा तत्र ज्ञानादेराश्रयतासंबंधेन चैत्रादौ प्रकारत्वे ज्ञाने चैत्रस्यादावपि ज्ञानवांश्चै

त्र इत्यन्वयबोधापत्तिः पदार्थोपस्थितियोग्यताज्ञानादिसामग्रीसत्वात् तथा चैतदापत्तिवारणाय तथा तत्र ज्ञानादेः

साक्षात् चैत्रादिप्रातिपदिकार्थप्रकारतासंबंधेनान्वयः किंतु ज्ञानरूपधात्वर्थस्याख्यातार्थाश्रयत्वे तस्य च चैत्रे तथा च ज्ञाना

श्रयत्ववांश्चैत्र इति बोधादाख्यातस्याश्रयत्वार्थकत्वमावश्यकमिति सिद्धांतिनो मतमिति शंकेति भावः पुनरपि पूर्वप

क्षी सिद्धांतिशंकामुद्धरति । तादृशान्वयबोधे इति ज्ञानवांश्चैत्र इति ज्ञानप्रकारकचैत्रविशेष्यकाश्रयतासंसर्गक

बोधे आख्यातेन तथा च समभिव्याहारज्ञानस्य हेतुत्वात् जानाति स्वैकवचनं तथा च समभिव्याहृतप्रथमैकवचनो

त्तरचैत्रादिपदजन्योपस्थितिनिरूपितकारणतावादित्यर्थः तथा च ज्ञानं चैत्रस्याख्यातोत्तरधात्वसमभिव्याहारा । ७५

भावात्तत्तानवच्छेत्रइतिबोधापत्तिरित्याख्यातस्याश्रयत्वार्थकत्वकल्पनं निर्युक्तिकमिति भावः भावनेप्याश्रयताप्रका
रकबोधेतादृशसमभिव्याहारस्तानेहेतुतायाआवश्यकत्वादिति मूलं भवतोपि आख्यातस्याश्रयत्वार्थकत्वार्थतावादिसि
द्धं तिनेपि आश्रयताप्रकारकबोधे ज्ञानाश्रयत्ववच्छेत्रइतिबोधेतादृशसमभिव्याहारस्तानेहेतुता: पजानातिचैत्र
इत्याकारकाख्यातेकवचनान्तताथात्वसमभिव्याहृतप्रथमैकवचनान्तचैत्रपदज्ञानस्य ज्ञानवच्छेत्रइत्यादिशाब्द
प्रतिहेतुताया: आवश्यकत्वात् अन्यथाजानंतिचैत्रइत्याकारकबहुवचनान्तताथात्वएकवचनान्तचैत्रपदसमभि
व्याहारस्थलेपि आश्रयताप्रकारकशाब्दबोधापत्ते: यद्यज्ञमपदार्थोपस्थित्यादिसामग्रीसत्वादितिशर्वपतिनोपिसम
भिव्याहारस्तानकारणताधिकेतिनाख्यातस्याश्रयत्वमर्थइति भावः आख्यातस्य सार्थकत्वं तावदवश्यापपत्तिपत्तिस्तारस्यतद
विसदित्यंतग्रंथेनआवश्यकं कृतिप्रकारकसमवायसंसर्गकबोधं प्रतिसमवायेनाख्यातजन्यकृत्युपस्थितित्वेनकारण
तेस्वभयमतसिद्धत्वेनावश्यकमित्यर्थः तथाचतदर्थविशेषान्विशेषप्रतिपचतीत्यत्रकृत्युपस्थितिस्यजानातीत्यत्रा

मु.टी.

७९

76

अथ पदोपस्थितित्वेन नञ्पतीत्यत्वनाशप्रतियोगित्वोपस्थितित्वेन आत्मनिष्ठप्रत्यासत्त्या कारणतास्वीकारे शाकलस्य
सह स्वार्थभेदेनाख्यातजन्योपस्थितीनां कारणताबाहुल्यमित्यर्थ विशेषान् अनिवेश्य विषयनिष्ठप्रत्यासत्त्यैव पदजनी
तादृशविशेष्यतासंबंधेन तथानर्थपाकप्रकारान्वयबोधं प्रति विशेष्यतासंबंधेनाख्यातत्वप्रत्ययजन्योपस्थितित्वेन कारणता
स्वीकारे लाघवमित्यर्थः अनुकूलतासंबंधेन पाकवतीकृतिरिति बोधाद्विशेष्यतयाख्यातबोधप्रत्ययजन्योपस्थितेः
कृतौ सत्त्वादिति भावः तादृशकारणताबाधेनेति· चैत्रो जानातीत्यर्थः नत्रथानर्थप्रकारकान्वयः बोधं प्रति प्रत्यय
जन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या उक्तहेतुत्वं तदोपपद्येत यदि स्यात्तत्त्वं प्रत्ययत्वं चानुगतं भवेत्तदेव तत्तु न
भ्वादिगणपठितत्वे सति क्रियावाचकत्वं धातुत्वमिति दूषितमन्यत्र एवं प्रकृत्युत्तरं विधीयमानत्वं प्रत्ययत्वमित्यपि व
ह्यष्टवरस्यत्रवड्जादिमत्यये ऽव्याप्तमित्याशयेनाह धातुत्वप्रत्ययत्वादीनामननुगततानो ऽनिर्वचनमेतादृशानुगत
कार्यकारणभावकल्पनं संभवतीति मम मतेरिति मूलं· तथाच धात्वर्थप्रकारकान्वयबोधे प्रत्ययजन्योपस्थितेरकारणत्वात् ७९

चैत्रो जानातीत्यादौ ज्ञानवांश्चैत्र इति बोधे प्राचीनमते बाधकाभाव इत्यस्माद्ख्यातस्य निरर्थकत्वं तदवस्थमि
तिभावः यत्तमते भूयो व्याख्यातस्यार्थकत्वमुपपादयति तदापीत्यादिना तदापि धात्वर्थस्य यत्नादीनामनु
गतत्वया धात्वर्थप्रकारकान्वयबोधे शक्यज्ञस्योपस्थितेरकारणत्वेऽपि पचतीत्याख्यातोरेव पाकादौ लक्षणा तत्र
जानातीत्यादिवाक्यात् पाककृत्यादिप्रकारकान्वयबोधोत्पत्तेरिति मूलं पचत्यत्रापि पाकप्रकारककृत्यादि
विशेष्यकबोधोत्पत्तेरेव वक्तुमुचितं न तु चैत्रविशेष्यककृतिप्रकारकबोधो वक्तुमुचितः सर्वमतकत्वात्:
धात्वर्थप्रकारकान्वयः बोधे तत्र व्यवहितोत्तरत्वेन शक्त्या जन्यकृत्युपस्थितेर्विशेष्यतासंबंधेन हेतुत्वादित्युप
संहारात्तथापि कृतिप्रकारक एव न धात्वर्थप्रकारकः चैत्रविशेष्यको बोध इति वक्तुं सर्वोक्तस्य वारणा
यत्तथोक्तमिति॰ ज्ञाधातवत्ति ज्ञादीनामनुगतत्वया पचधातोरेव पाकगमनपतनाद्यनेकव्यापारेषु ल
क्षणा तत्र लक्षणायां सत्यां चैत्रो जानातीत्यादिवाक्यात्पाकगमनाद्यनुकूलकृत्यादिप्रकारकान्वयबोधोत्पत्त्या वि
शेष्यतासंबंधेन ज्ञाधात्वर्थप्रकारकान्वयबोधे कृतौ जायमाने ज्ञाधातव्यवहितोत्तरतित्वतस्त्यादिप्रका

स्व·टी·
७७
77

रकंतिप्रतमादिविशेष्यकज्ञानंतज्जन्योपस्थितेः कृत्युपस्थितेः विशेष्यतासंबंधेनकृतौसत्वेनहेतु

तायाः तत्रचैत्रोजानातीत्यादिवाक्यस्थलेकस्यतीयतया· तादृशाकारणज्ञानाबाधात्तज्ञाधात्तत्तरति

ष्टजन्योपस्थितिरूपकारणस्यविशेष्यतासंबंधेनचैत्रेऽभावाच्चैत्रोजानातीत्यत्रज्ञानवांश्चैत्रइत्या

कारकशाब्दबोधानुपपत्तिरीश्वरैरेवत्यर्थः ज्ञाधातोः पाकगमनादिलक्षणायामास्मतिष्टप्रत्यास

त्याकारणताशालीकारेश्वरीकरीत्यापाकगमनाद्यनेकार्थविशेष्यतानिवेशप्रकारणतायांगौरवंविष

यनिष्ठप्रत्यासत्त्याकारणत्वेतुज्ञाधातुज्ञानजन्योपस्थितिविषयत्वेनपाकगमनाद्यनेकधात्वलक्ष्या

र्थनिवेशेपिविशेष्यतासंबंधेनकृतौजायमानेज्ञाधात्वर्थपाकगमनादिप्रकारकबोधेतिकृत

त्वादिप्रकारकति — तुसाध्यविशेषकज्ञानजन्योपस्थितेर्विशेष्यतासंबंधेनकृतौसत्वात् पाक

गमनाद्यनुकूलावाकृतिमांश्चैत्रइतिबोधेनतत्राश्रयतासंबंधेनज्ञानवांश्चैत्रइतिबोधः कारणीभू

ततिजन्योपस्थितेर्विशेष्यतासंबंधेनचैत्रेबाधात् किंतुज्ञाधात्वर्थसमभिव्याहृततिजन्योपस्थि ।

७७

तेर्लक्षणयाऽऽश्रयत्वे विशेष्यतासंबंधेन चैत्रे बाधात् किं तु तथा तत्समभिव्याहृततिङ्जन्योपस्थितेर्लक्ष
णयाऽऽश्रयत्वे विशेष्यतासंबंधेन सत्त्वात्तथा तात्पर्यज्ञाननिष्ठप्रकारतानिरूपिताऽऽश्रयत्वनिष्ठविशे
ष्यताभिन्नप्रकारतानिरूपितचैत्रनिष्ठमुख्यविशेष्यताशालिज्ञानाश्रयत्ववांश्चैत्र इति बोधो जायते इ
त्याख्यातस्य सार्थकमस्तु दसामेवेति· अथैवमपीत्यादि सर्वपत्तीभूयोऽपि तात्पर्यप्रकारकचैत्रविशेष्य
कबोधमुपपादयति प्रत्ययांतरार्थविशेषविशेष्यकबोधे व्यभिचारवारणायेति· ज्ञानन्तु तात्पर्यादेर्ज्ञानप्र
कारकाश्रयविशेष्यकबोधो शवाद्यर्थेऽऽश्रये जायते तत्र तिङ्ज्ञानजन्योपस्थितेरभावाद्व्यभिचारस्तद्वा
रणाय तादृशोपस्थितिवैशिष्ट्यस्य तिङ्ज्ञानजन्यतदुपस्थितिवैशिष्ट्यस्य· तादृशोपस्थितित्वकार्यताव
च्छेदककोटावश्यं निवेशनीयतयाऽऽख्यातज्ञानजन्यतदुपस्थितिरूपकारणाजन्यदायात्सलसार्थयाका
दिप्रकारकशाब्दबोधत्वरूपकार्यतावच्छेदकं निवेशनीयं तत्त्वेतस्यार्थः· तथा च· ख्यातार्थकृत्युपस्थि
त्यव्यवहितोत्तरत्वान्यथात्वर्थपाकादिप्रकारकशाब्दबोधत्वावच्छिन्नं ज्ञाथान्तराऽऽख्यातजन्यकृत्युप

२५
श·प्र·

व्यु.टी.
२९

स्थितित्वेनकारणत्वमिति: ज्ञानत्तात्ताइत्यादिस्थलीयोबोधः तिङ्त्तानजन्यप्रकृत्युपस्थितिसमनन्तरत्वात्
कार्यतावच्छेदकाक्रान्तत्वमेवनभवतीतिनव्यभिचारइतितदुत्तरशाब्दबोधेतिङ्त्तानजन्यप्रकृत्युपस्थि
समनन्तरशाब्दबोधेतिङ्त्तानजन्यप्रकृत्युपस्थितिकार्यतावच्छेदकानाक्रान्तेचैत्रोजानातीत्यादिवाक्यस
हकृतपदार्थोपस्थितियोग्यताज्ञानादिरूपसकलसामग्रीवशात्संपन्नेश्राश्रयतासंसर्गकचैत्रविशेष्य
न्वयापत्तिर्न संभवत्यत आह स्वार्थमात्रपरेति लाक्षणिकार्थपरपदादारादिशब्दानां बहुवचनान्ततोपपादनेपि उ

वु॰ टी॰
१२९
126

ख्यार्थमात्रपरत्वात् दशप्राह्लानां अप्दारादिशाह्लानां बहुवचनं तन्मात्रानुपपत्तेश्चेति॰ एकस्मिन्नर्थः परमाणौ एकसंख्या
राजयोषिति आयः दारा इति बहुत्वस्याबाधादिति भावः इति न किंचिदेतदिति तदुक्तगुणानामादाय बहुवचनोपा
दनमसमंजसमित्यर्थः अवादिपदार्थे एकद्वित्वान्वययोग्यतासत्त्वेपि असाधुत्वादेव न तु तत्र एकवचनद्विवचनं च
न प्रयुज्यते इति आपः स्त्री भूम्नि वार्वारि दाराः पुंभूम्नीति चामरकोषात् अस्मदादिकप्रयुक्ताप्रयुक्ताः वपि बहुवचनं साधुः
आपो दारा इत्यत्र तु एकस्याप्यर्थे एकत्वान्वययोग्यतासत्त्वेपि एवं व्यक्तिद्वये द्वित्वान्वययोग्यतासत्त्वेपि असा
धुत्वादेव अनुशासनानन्तशिष्टत्वरूपासाधुत्वादेव अपदारादिशाह्लात्तत्र एकवचनद्विवचनेन भवत इत्य
र्थः इति व्युत्पत्तिवादे सुप्विभक्तिविवरणं॰ आख्यातैकवचनस्यासंख्यार्थकत्वे विवदंते निषेधानुसारिण इ
ति यत्र आख्याते एकवचनं तत्र तत्र स्त्रैवैकवचनं नियतं कर्तृप्रत्ययस्य ले कर्मप्रत्ययस्य लेन्तु तत्र एकत्वस्वार्थः
आख्यातार्थौ वेति विवदंते इत्यर्थः आख्यातादिबहुवचनयोः संख्यार्थकत्वमस्त्येव न विवादः चैत्रो मे १२९
त्रम्य गच्छतः सचैत्रश्च अहं च मैत्रमः इत्यत्र स्त्र्य द्विवचनबहुवचनयोः नियमादाख्यातमेव द्वित्वबहुत्ववाचकं न तु सुब्विभक्ति-
वीविके

त्यर्थः घटोऽस्तीत्यादौ स्वैकवचनादेवसंख्याबोधसंभवादिति· स्वैकवचनादेवानेकारणस्यानेकवचनस्य संख्या।
नोधकत्वव्यवच्छेदः चैत्रेण दृष्टो घट इत्यादौ आख्यातं विनापि स्वयाएकत्वबोधनात् तस्यानेकबोधकताया
स्वैकवचनस्यैकत्वबोधकताया आवश्यकत्वादित्यर्थः पंकतेन चैकवचनत्वेनेति· समाप्तेनैकवच
नत्वस्येति· आख्यातस्य च साधारणैकवचनत्वेनैकत्वे शक्तिरिति न आत्माश्रयान्योन्याश्रयादिदोषः एवं
मेव इति पक्तन इत्यर्थः तथ्य त्वङ्जन इति न्यायेनाह अस्त्वेवमिति तेन रूपेण· एकवचनत्वेन रूपेण
ति· एकवचनस्याप्येकत्वे शक्तिः तथापि तिङ्जन्यैकत्वोपस्थितेः शाब्दबोधे हेतुत्वे मानाभावा माना
भावमुपपादयति न हीति सामान्यत एकवचनज्ञानजन्यैकत्वोपस्थितिं तेन न शाब्दबोधसंभवः एक
त्वशाब्दबोधसंभवो न हीत्यर्थः वस्तुतस्त्विति· एकत्वोपस्थितिं प्रति एकवचनज्ञानजन्यैकत्वोपस्थि
तित्वेन कारणत्वांगीकारे सतीत्यर्थः एकत्वे· अग्रहीतस्वपदवृत्तिकस्येत्युक्तेः स्वपदमेकत्वे घटादिप
दोपस्थाप्य घटादौ पदमेकत्वेन तस्मादि पदोपस्थाप्यैकत्वान्वयबोधप्रसंगः इतिपरन्तपरुषेणाघटः २

बु·टी·
१२७
127

त्तिग्रहं तं घटपदेशक्तिग्रहीताः घटपदोत्तरं सुपदस्यैकत्वे शक्तिग्रहीता पदाविनत्रापि एकत्वेऽर्थे शक्तिग्रहीतानस्य
पुंसः अनुपस्थाप्यैकत्वं परं घटे भासते घटेन भासते सुपस्थाप्यैकत्वं घटेऽपि भासेत अतः अत्ररूपैकवचनजन्यैकत्वोपस्थि
तिरूपकारणाभावात् तद्धारणाय सुपदत्वादिप्रकारकसुपदविशेष्यकज्ञानजन्यकर्मत्वोपस्थितित्वेनैव एकत्व
प्रकारकोपस्थितिं प्रकारणाभावात् तद्धारणाय सुपदत्वादिप्रकारकसुपदविशेष्यकज्ञानजन्यकर्मत्वोपस्थिति
त्वेनैव एकत्वप्रकारकघटादिशाब्दबोधं प्रति हेतुतासंभवाः तथा सति· एकत्वप्रकारकशाब्दबोधं प्रति सुपदत्वादि
प्रकारकज्ञानजन्यैकत्वोपस्थितित्वेनैव कारणतांगीकारे सति घटादिपदोत्तरसुपदत्वरूपो व्य· आनुपूर्वी·
विशेषस्तद्व्याग्राः आकांक्षायाय ज्ञानं तत्तद्घटितानां पदानां पदीयैकत्वान्वयबोधस्य सामग्र्यां सुपदत्वादिप्र
कारकधीजन्योपस्थितेरंतर्भावान्नतादृशायनेनरनवकाशात् अंतर्भावादिसनेन आकांक्षाज्ञानकारण
तायैव निर्वाहे सुपदत्वादिप्रकारकधीजन्योपस्थितेः पृथक्कारणत्वाकल्पनलाघवं दर्शितम् तादृशापा
तेः एकत्वेऽ ग्रहीतसुपदवृत्तिकायस्य पुंसो घटदौ घटादिपदोत्तरामपदोपस्थ ॥ १२७

ध्येकत्वान्वयबोधापत्तेरनवकाशादित्यर्थः एवं चेत्तिङन्तोपस्थितत्वेन एकत्वशाब्दबोधे तत्तन्मानाभाव
इत्यर्थः पचतीति· नयोस्तृतीयाद्वितीययोः न वैयाकरणमते तत्र लकारेण कर्तृकर्मणोरभिधीयतां इति
तदनभिधानस्य कर्तृकर्मानभिधानस्य तृतीयानियामकतायाः कर्तृकर्मगतसंख्यानभिधाने तृतीया
द्वितीयानियामकता मास्ति त्वन्मते आह नैयायिकमते इति तदनभिधानस्य· कर्तृकर्मानभिधानस्य
तृतीयाद्वितीयानियामकत्वासंभवात् कर्तृकर्मगतसंख्यानभिधानमेव तृतीयादिनियामकं इत्या
ख्यानस्य संख्यावाचकत्वमावश्यकमितिभावः न त्वेकवचनत्वेन एकत्वावच्छिन्नशक्तिस्वीकारात्
चैत्रः पचतीत्यत्रेव चैत्रेण पच्यते इत्यत्राख्यातैकवचनेन चैत्रगतैकत्वाभिधानात्कर्त्रादिगत
संख्यानभिधानस्य कर्त्रादिवाचकपदोत्तरतृतीयादिनियामकत्वेन संभवं नीशंकते तेनचेतिसमाध
नेयत्नस्तु इत्यादिना चैत्रादिगतसंख्यानभिधायकत्वं· सकर्मके चैत्रेण पच्यते इत्यत्र किं नाम न हि चैत्रग
तैकत्वादिसंख्यानिष्ठाया शक्तिः रूपावृत्तिस्तदनिरूपकत्वं त्वाख्यातैकवचनस्य चैत्रगतैकत्वनिष्ठशक्तिनि

व्यु॰टी॰ रूपकत्वात् अपि तत्तद्विशेष्यकः चैत्रादिविशेष्यकः आख्यातार्थैकत्वसंख्याप्रकारकः चैत्रः पचतीति वाक्यज
१२८ न्यः शाब्दबोधस्तद्वत्कूलत्वं चैत्रेण पच्यत इति स्थलीयं तत्र चैत्रपदसमभिव्याहृतैकवचनेनवर्णितेदमेव
128 चैत्रादिगतसंख्यानभिधायकत्वं तथा च कर्त्रादिविशेष्यकः लकारार्थैकत्वसंख्याप्रकारकान्वयबोध
स्तज्जनको यो लकारादिस्तत्समभिव्याहृतकर्त्रादिवाचकचैत्रादिपदं तस्मात्तृतीयाद्योभवंति एवं कर्मवि
शेष्यकः आख्यातार्थैकत्वसंख्याप्रकारकः शाब्दबोधस्तज्जनकं तंडुलः पच्यते इति लकारादिः तदजन
कः तंडुलं पचतीति लकारादिः तत्समभिव्याहृतकर्मादिवाचकपदात् द्वितीया इति कर्त्तृकरणयोस्तृ
तीया कर्मणि द्वितीया इत्यनुशासनयोस्तात्पर्यं संख्याकालातिरिक्तार्थो भावना भावनान्वयिनि संख्यान्वय
इति नियमात् साक्षात्समवायसंबंधेन भावनान्वयी चैत्रः तंडुलं पचते तत्र प्रथमांतोपस्थाप्यश्चैत्रस्तत्रैव सं
ख्यान्वयः कृतिमानेकश्चैत्र इति शाब्दबोधात् चैत्रेण पच्यते तंडुल इत्यादौ परंपरया स्वप्रयोज्यव्यापारजन्यफलवत्
रूपपरंपरासंबंधेन तंडुलो भावनाविशेष्यस्तत्र स्वं चैत्रवृत्तिस्तज्जन्यो व्यापारः फूत्कारादिस्तज्जन्यं फलं विक्लित्तिस्त १२८

ष्टत्वं चैत्रनिष्ठभावनाजन्यफलशालीतंडुल इति बोधात् उपसंहरति· तस्मादिति तिवादेः संख्यान्वभिधायकत्वेक
र्तृकर्मणोस्तृतीयाद्वितीययोश्च वक्ष्यमाणानुपपत्तिरूपदोषोस्ति वोदेशेपि संख्याबोधकत्वमावश्यकमित्यर्थः न
नु कर्त्रादिनिष्ठसंख्याबोधोऽनुकूलकारादिसमभिव्याहृतकर्त्रादिवाचकपदात्तृतीयेत्यत्र कर्तृकरणयो
स्तृतीयेति तृतीयेति सूत्रनानर्थमित्युक्तं तत्र लकारादौ कर्त्रादिनिष्ठसंख्यान्वयबोधोऽनुकूलत्वंफ
लोपधायकत्वलक्षणं विवक्षितं तंडुलस्वरूपयोग्यत्वलक्षणं इति विकल्प्य दूषयति तत्र शोभनमिति·
तथाहीति आद्ये आह चैत्रः तंडुलं पचतीत्यत्र चैत्रादिरूपकर्तृविशेष्यकैकत्वप्रकारकान्वयबोधानुकूल
त्वं तिवेकवचनेऽस्ति कर्त्रादिनिष्ठसंख्यान्वयबोधोपधायकत्वं चैत्रेण तंडुलः पच्यते इत्यत्र तेरप्येक
वचनमस्ति इति चैत्रेणेति तृतीयापत्तिः यदि नाद्यबोधोपधायकज्ञानविषयत्वाभाववत्त्वं तदा या
दृशानिवादिज्ञानेन चैत्रः पचति तंडुलमिति तिवादिज्ञानेन सहकार्यन्तरविरहात् विवेकवचनमेकत्वा
न्वशाब्दमिति बोधजनकं प्रकारकं चैत्रविशेष्यकबोधकारणविघटकतया प्रतिबंधकं· विरहः सहका

बु·टी· यैर्नत्वं तद्विरहात्तद्बाधत्त्वानात्तत्ता दृशबोधो न जनितः पाकानुकूलकृतिमांश्चैत्र इति बोधो न जनितः तत्र नियेकत्व
वनज्ञानं एकत्वप्रकारकचैत्रविशेष्यकबोधरूपफलानुपधायकमिति तादृशबोधो यस्य यकज्ञानविषयक
१२९ त्वाभाववत्त्वरूपनियामकत्वान्न योगीबाधकालीनतिवादियोगी चैत्रेण तंडुलं पचतीति तृतीयायाप्तिरि
129 त्यर्थः द्वितीयमाह यदि चेति तादृशबोधस्वरूपयोग्यताज्ञानविषयित्वाभाव इति एकत्वप्रकारकचैत्रविशेष्य
कशाब्दबोधनिष्ठकार्यतानिरूपिताख्यातैकवचनत्वादिरूपकारणतावच्छेदकधर्मवत्त्वप्रकारकज्ञानवि
षयत्वाभावस्तदा चैत्रेण तंडुलः पच्यते इति यत्रादि समभिव्याहृतात्मनेपदज्ञानस्यापि तादृशबोधस्वरू
पयोग्यत्वात् एकत्वप्रकारकज्ञानविषयत्वाभावसत्त्वाच्चैत्रेण तंडुलः पच्यते इति यत्रादि समभिव्याहृतात्म
नेपदज्ञानस्यापि तादृशबोधस्वरूपयोग्यत्वात् एकत्वप्रकारकचैत्रविशेष्यकशाब्दत्वनिरूपिताख्यातैकवच
नत्वनिष्ठत्वे तत्त्वादिप्रकारकज्ञानस्वरूपं स्वरूपयोग्यत्वात्तं तद्विषयतिवाख्यातस्यैवास्ति इंतिवादेनैसंख्याबोध १२९
कत्वमिति भावः शंकते नन्वथेति चैत्रविशेष्यकैकत्वप्रकारकत्वान्वयबोधं विना वह्निं न यति चैत्र यत्समभिव्याहृततिवा

दिविषयकज्ञानत्वेन हेतुताऽऽह तिकर्त्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकं
विषयित्वं चैत्रपदसमभिव्याहृततिवादिविषयकज्ञाननिष्ठं निरूपकत्वं चैत्रः तण्डुलं पचतीति पदेऽप्यसि
द्धं· चैत्रेण तण्डुलः पच्यते इत्यत्र ते पदे तादृशविषयतानिरूपकत्वं न देवतादृशबोधानुकूलत्वं कर्त्रा
दिनिष्ठसंख्यान्वयबोधानुकूलत्वं· तण्डुलः चैत्रेण पच्यते इत्यत्र ते पदे स्तीति कर्त्रादिविशेष्यकसंख्यान्व
यः बोधे जनककलकारादिसमभिव्याहृतकर्त्रादिवाचकचैत्रपदात्तृतीयोपपत्तिरित्यर्थः चैत्रः पच
तीत्यादिवाक्यघटकतिवादिज्ञाननिष्ठा तिवादिनिष्ठविषयतानिरूपितविषयिता चैत्रादिविशेष्यकप्रकार
संख्याप्रकारकान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदिकेति तादृशान्वयबुद्धित्वावच्छिन्नं
प्रति चैत्रादिविशेष्यकसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्नं प्रति चैत्रादिपदसमभिव्याहृतसिवादिपद
ज्ञानस्य हेतुत्वात् चैत्रेण पच्यते तण्डुल इत्यादिवाक्ये तेत्यादिपदनिरूपिततिवादिपदज्ञाननिष्ठविषयिताया
नतादृशी· न च चैत्रादिविशेष्यकेकत्वरूपसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदि

व्यु॰टी॰ काचैत्रादिपदसमभिव्याहृतानां तादृशपदज्ञानत्वेन। तिबादिपदज्ञानत्वेन। तादृशान्वयबुद्धित्वावच्छिन्नं प्रति चै
१२॰ त्रादिविशेष्यकसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्नं प्रति च हेतुत्वादित्यर्थः। सिद्धान्तिशंकते नचेति चैत्रः पच्यते इत्यादौ चैत्रवि
130 शेष्यकाख्यातार्थसंख्याप्रकारकान्वयबोधोन्यत्र चैत्रसमभिव्याहृतं तयादिपदज्ञानत्वेनापि तादृशान्वयबुद्धित्वावच्छि
न्नं प्रति चैत्रविशेष्यकाख्यातार्थप्रकारकान्वयबुद्धित्वावच्छिन्नं प्रति हेतुतानास्तीति। चैत्रेण पच्यते इत्यादिवाक्यज
न्यकीभूततयादिपदविषयितापि तादृश्येव। तयादिपदनिरूपिततयादिपदज्ञाननिष्ठाविषयितापि चैत्रादिवि
शेष्यकसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्नजनकतावच्छेदककोटिनिविष्टेति तादृशपेत्वमपर्थ्यः। तथा च सर्वमव्या
ख्यानं कर्त्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकमे
व कर्तृपदोत्तरवर्तीयाप्रयोजकं तादृशविषयितानिरूपकमाख्यातमेवाप्रसिद्धमिति। कर्त्रीविशेष्यकसंख्या
न्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकाख्यातसमभिव्याहृतकर्त्रादिवा
चकपदोत्तरवर्तीयादयः कथमन्यथा तदुत्तरनत्रेणपच्यते तंडुलः इत्यत्रापि चैत्रः पच्यते तंडुलः इति शंकायां समाधत्ते चैत्रेण प १२॰
च्यते चैत्रः

पच्यते इत्यादिवाक्यात् चैत्रादिविशेष्यकभावनाप्रकारकान्वयबोधस्य एवं चैत्रादिविशेष्यकसंख्याप्रकारका
न्वयबोधस्य चानुदयात् तद्विशेष्यकतदुभयान्वयबोधे चैत्रविशेष्यकभावनासंख्योभयप्रकारकशाब्दबोधे
प्रथमान्तचैत्रादिपदसमभिव्याहृतशवादिविकरणोत्तरं यत् चैत्रः पचति चैत्रः पचतीत्यत्रातितयादि
तत्तदाख्यातपदं तज्ज्ञानत्वेन हेतुत्वात् चैत्रेण पच्यते तंडुल इत्यादिवाक्यघटकतयादिपदानां तादृशस
मभिव्याहारादिशून्यतया प्रथमांतचैत्रादिपदसमभिव्याहृतशिवादिविकरणोत्तरत्वरूपसमभिव्या
हारादिशून्यतया तद्विषयितायाः चैत्रेण पच्यते तंडुल इत्येतद्वाक्यघटकतयादिनिरूपितयगादित्वान्
निष्ठविषयितायाः अतादृशत्वात् चैत्रादिविशेष्यसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपि
तजनकतावच्छेदकत्वात् तथाच चैत्रः पच्यते इत्यादिप्रयोगे तदाख्यातस्य चैत्रविशेष्यकसंख्यान्वयबुद्धिनि
रूपितजनकतावच्छेदकविषयितानिरूपकत्वात् तत्समभिव्याहृतकर्तृपदे तृतीयैव साधीति चैत्रेण पच्यते
इत्येव भवति न तु चैत्रः पच्यते इति भावः चैत्रः पच्यते इत्यादिनप्राप्तप्रथमान्तेतीया द्वितीययोरप्रसक्त्याविरहसत्त्वतः

व्यु.दी.
१३१
131

र्यं कार्यत्वः चैत्रः पचति तंडुलमिति लकारः कर्तृत्वस्य परत्वेन तत्र चैत्रविशेष्यकबोधात् एवं तंडुलः पच्यते इति कर्मण्याख्या
तलकारः न तत्र तंडुलविशेष्यकबोधः यतः प्रथमांतचैत्रतंडुलादिपदसमभिव्याहृतस्यैव तत्तदाख्यातानां चैत्रादि
विशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजनकतानिरूपितजनकतावच्छेदकविषयित्वनिरूपकत्वात् तृतीयाद्वि
तीययोरप्रसक्तौ ईदृशविषयित्वानिरूपकत्वेन आख्यातपदसमभिव्याहृतचैत्रतंडुलादिपदत्वं प्रथमायां नियाम
कमिति चैत्रः पच्यते तंडुल इति प्रथमांततंडुलकर्तृकर्मणोः प्रयोगः स्यादिति चेत् चैत्रादिविशेष्यकसंख्याप्रका
रकान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकविषयित्वानिरूपकाख्यातसमभिव्याहृतचैत्रपदत्वं तृतीयाप्रयोज
कमेवमीदृशविषयित्वानिरूपकाख्यातपदसमभिव्याहृततंडुलपदत्वं द्वितीयाप्रयोजकमिति पूर्वमावे
दितमेव तदभावाच्चैत्रः पच्यते तंडुल इत्युभयत्र कर्तृकर्मणोः प्रथमास्यादिति भावः चैत्रः पच्यते तंडुल
इत्यत्र चैत्रतंडुलोभयविशेष्यकैकत्वसंख्याप्रकारकान्वयबोधाजनकसमभिव्याहारः प्रथमांतचैत्रतं
डुलपदसमभिव्याहृतस्य प्रत्ययांतस्य च समभिव्याहारः ते इत्याख्यातपदोपस्थापकसमभिव्याहृतस्य १५

समभिव्याहृतत्तेऽन्याख्यातपदस्यानत्वेन चैत्रतंडुलविशेष्यकसंख्याप्रकारकान्वयबुद्धिनावच्छिन्नहेतुता
त् चैत्रः पचति तंडुलं इत्यत्र चैत्रतंडुलोभयविशेष्यकाख्यातार्थसंख्याप्रकारकान्वयः बोधोपपत्तिकः प्रथमान्त
चैत्रतंडुलपदसमभिव्याहृतस्य मेत्यर्थान्तपचधातुसमभिव्याहारस्ते प्रत्यये स्ति तज्ज्ञानकारणात्तानन्ति
ष्ठायाविषयितायानिरूपकता संबंधेन प्रत्ययेसत्त्वेन विषयितानिरूपकाख्यातसमभिव्याहृतसमभि
व्याहृतचैत्रादिकर्तृपदात्तृतीयाप्रवंताहृशविषयितानिरूपकाख्यातपदसमभिव्याहृततंडुलपदात् द्वि
तीयार्थत्वविषयित्वनिरूपकाख्यातसमभिव्याहृतकर्तृकर्मणोस्तृतीयाद्वितीययोरप्रसक्तावपीतिशंका
यां समाधानमाह तादृशवाक्यात्पत्राः प्रयुंजते इति प्रयोगे हेतुमाह कर्त्रादिसाकांक्षसमवायसंबंधेन
भावनाविशेष्यकान्वयबोधस्य एवं कर्मणि आख्यातार्थभावनायाः स्वप्रयोज्यस्वप्रयोज्यव्यापारजन्यफल
वत्त्वसंबंधेन भावनाविशेषणकान्वयबोधस्य च युगपज्जनकतायामानस्य व्युत्पन्नतया तादृशवाक्यात्
चैत्रः पचति तंडुलं इति वाक्यात् चैत्रतंडुलोभयविशेष्यकान्वयबोधासंभवात् न चैत्रः पचति तंडुलः इति व्युत्पन्नाः

व्यु·टी· प्रयुंजते इत्यर्थः शंकते नचाकांक्षायोग्यतादेसत्तात्कथं न चैत्रः पचति तंडुल इति प्रयोग इति वाच्यमिति. समा
१२२ धत्ते अत्रगमेति अत्रगमाद्यपर्याप्त्यभावेन एकविधान्वयबोधे चैत्रविशेष्यकपचते इत्याख्यातार्थकत्वप्रकारक
132 बोधे अत्रमतियान्वयबोधसामग्र्यास्तंडुलविशेष्यकपचते इत्याख्यातार्थसंख्याप्रकारकान्वयबोधसामग्र्याः
प्रथमान्ततंडुलपदसमभिव्याहृतपचते इत्यादितया न योग्यताकांक्षातात्पर्यज्ञानादिरूपायाः तद्बोधकसामग्री
घटकतात्पर्यज्ञानस्य बालादावभावात्प्रतिबंधकतायोगात् एवं तंडुलविशेष्यकाख्यातार्थसंख्याप्रकारकान्वयबोधे प्र
थमान्तचैत्रपदसमभिव्याहृतपचते इत्याख्यातपदजन्योपस्थितिघटितयोग्यताज्ञानादिसामग्र्याः प्रथमान्त
चैत्रपदसमभिव्याहृतपचते इत्याख्यातपदं चैत्रविशेष्यसंख्याप्रकारकान्वयबोधं जनयतु इति तात्पर्यज्ञानस्य
बालादावप्रतिबंधकतोपगमात् परस्परप्रतिबध्यप्रतिबंधकभावोपगमात्संदेहो यस्तु दन्यायेन सत्प्रतिपक्ष
स्थलीयानुमितिवत् चैत्रतंडुलोभयविशेष्यकपचते इत्याख्यातार्थसंख्याप्रकारकबोधानुदयादिति भावः
शंकते नन्वेवं तंडुलः पच्यते चैत्रेणेति कर्माख्याते तंडुलं पचति चैत्र इति कर्त्राख्याते वाक्यद्वयविषयकसमूहालंबनदशायां १२२

अपिचैत्र

विशेष्यकतण्डुलविशेष्यकोभयविधान्वयापत्तिः चैत्रविशेष्यकशाब्दबोधे तण्डुलविशेष्यकशाब्दसामग्र्याः एवं
तण्डुलविशेष्यकशाब्दबोधे चैत्रविशेष्यकशाब्दसामग्र्याः प्रतिबन्धकत्वादिति भावः पूर्वपक्षी समाधत्ते तादृशै
कविधान्वयबोधे इति मन्मते तण्डुलपदसमभिव्याहृतपच्यतेइत्याख्यातजन्यतण्डुलविशेष्यकसंख्या
प्रकारकान्वयबोधे तादृशान्यविधान्वयबोधप्रयोजकत्वेन मन्मते चैत्रपदसमभिव्याहृतपच्यतेइत्याख्या
तजन्यचैत्रविशेष्यकसंख्याप्रकारकान्वयबोधप्रयोजकमिदमाख्यातं चैत्रः पच्यते तण्डुलइत्येतद्वाक्यघटकं
पच्यतेइत्याख्यातपदं तादृशान्यविधान्वयबोधपरत्वेन गृह्यमाणमेव तथाविधमाख्यातं पच्यतेइत्याख्या
तं तादृशाख्यातं धर्मिकमेव चैत्रविशेष्यकसंख्याप्रकारकान्वयबोधपरत्वज्ञानं मत्कृतान्वयबोधपरत्वज्ञा
नं तत्सत्त्वे तादृशैकविधान्वयबोधे हेतुत्वं नास्ति अपि तु तादृशैकविधान्वयबोधे तण्डुलः पच्यते चैत्रेणेत्यत्र
तण्डुलविशेष्यकाख्यातार्थसंख्याप्रकारकान्वयबोधे तादृशचैत्रविशेष्यकाख्यातार्थसंख्याप्रकारकः अन्यवि
धः तण्डुलान्यचैत्रविशेष्यकोबोधस्तत्परत्वे गृह्यमाणं तण्डुलं पच्यते चैत्र इति कर्त्राख्यातं अगृह्यमाणं पुनस्तण्डुलः

व्यु॰ टी॰ पच्यते चैत्रेणेति कर्माख्यातं तथाविधमाख्यातं तद्धर्मिकं यत्प्रकृत्यान्वयबोधपरत्वत्वानं तंडुलः पच्यते चैत्रेणेति क
१३२ र्माख्यातं तंडुलविशेष्यकसंख्याप्रकारकान्वयबोधपरमिति तानं·प्रकृत्यान्वयबोधपरत्वाज्ज्ञातं तत्र स्वत्वानस्वतादृशे
133 कविधान्वयबोधे तंडुलविशेष्यकसंख्याप्रकारकान्वयबोधे हेतुतया चैत्रः पच्यते तंडुलइत्यादिवाक्यात्तंडुल
चैत्रोभयविशेष्यकतादृशाद्विविधान्वयबोधवारणाय स्पष्टाकयत्वादिति चैत्रः पच्यते तंडुलइत्यत्रैकमेवप
दमिति इत्याख्यातं चैत्रविशेष्यसंख्याप्रकारकान्वयबोधपरत्वेन ग्रहमाणमिति: नादृशोकविधान्वयबोधपरत्वेन ग्र
हमाणंभवति अथ च चैत्रान्यतंडुलविशेष्यकसंख्याप्रकारकान्वयबोधपरत्वेन ग्रहमाणमिति तादृशान्व
यान्वयबोधपरत्वेनापि ग्रहमाणंनभवंति इत्यग्रहमाणतथाविधाख्यातधर्मिकप्रकृत्यानुपबोधपरत्वत्तान
त्रूपहेतुभावात् चैत्रः पच्यते कर्माख्यातंतंडुलविशेष्यकसं तंडुल इतिनभवतिभवति च तंडुलः पच्यते चैत्रे
णेति तंडुलं पचति चैत्र इति समूहलंतज्ञानमपि शाब्दधीतंडुलः पच्यते कर्माख्यातं तंडुलविशेष्यकसंख्याप्रकार
कान्वयबोधपरत्वेन ग्रहमाणे तत्कर्माख्यातं चैत्रविशेष्यकसंख्याप्रकारकान्वयबोधपरत्वेन ग्रहमाणंनभवति किंतु तंडुले ७१

कर्त्राख्यातमेव तंडुलाम्पचैत्रविशेष्यकसंख्याप्रकारकान्वयबोधपरत्वे तत्समाणमिति कारणाभावाच्चैत्रः पच
ते तंडुलमिति न भवति भवति च तंडुलः पच्यते चैत्रेण तंडुलं पचतीति चैत्रकारणत्वात् दर्शनवाक्यात् तंडुलः
पच्यते चैत्रेण तंडुलं पचते चैत्र इति वाक्यात्तदुपपादनस्य तंडुलविशेष्यकचैत्रविशेष्यकबोधोपपादनस्या
वश्यकत्वादित्यर्थः । शंकते नवेति तत्र संख्यानभिधानस्यान्तरीयाद्वितीयानियामकत्वे इति चैत्रविशेष्यकसंख्या
प्रकारकबोधजनकतावच्छेदकविधयित्वानिरूपकाख्यातसमभिव्याहाररूपस्य संख्यानभिधानस्यान्तरीया
द्वितीयानियामकत्वे चैत्रेण स्वं दृश्यते इत्यत्र स्वपदार्थे चैत्ररूपकर्त्तान द्विशेष्यकसंख्याप्रकारकबोधजनक
तावच्छेदकविधयित्वनिरूपकदृश्यते इत्याख्यातसमभिव्याहारस्य चैत्रपदे सत्त्वेन तृतीयाऽनुपपत्तिः एवं चैत्रः
स्वं पश्यतीत्यत्र स्वपदार्थे चैत्रादिविशेष्यकसंख्याप्रकारकबोधजनकतावच्छेदकविधयित्वनिरूपकपश्य
तीत्याख्यातेन समभिव्याहारस्य कर्मवाचकत्वपदे सत्त्वेन द्वितीयानुपपत्तिरित्यर्थः । कर्त्रादिविशेष्यकेति चैत्रेण
स्वं दृश्यते इत्यत्र कर्त्रादिविशेष्यकसंख्यान्वयबोधौपयिकाकांक्षास्वपदोत्तरदृशधातूत्तरतेप्रत्ययादिसमभिव्याहार

रूपा चैत्रपदनिष्ठाजन्यतातीयं तज्ज्ञाननिष्ठं यत्विषयितेतन्निरूपकत्वस्य तत्राख्याते चैत्रेणासं दृश्यते इत्याख्याते सत्वात्
एवं च तादृशविषयितानिरूपिकाख्यातसमभिव्याहृतत्वरूपानभिधानस्य चैत्रपदे सत्वेन तृतीयानुपपत्तिरित्यर्थः
एवं चैत्रः स्वं पश्यतीत्यत्र स्वपदार्थचैत्रविशेष्यकसंख्यान्वयबुद्धिजनकं चैत्रपदसमभिव्याहृतपश्यतीत्याख्यातस
मभिव्याहारज्ञानेन तन्निष्ठविषयितानिरूपकमेव पश्यतीत्याख्यातमिति तादृशविषयितानिरूपकाख्यातसम
भिव्याहाररूपस्यानभिधानस्य स्वपदे असत्वात् चैत्रः स्वं पश्यतीत्यत्र द्वितीयानुपपत्तिः समाधेयेत कर्त्रादिपरेति
चैत्रेणाश्वं दृश्यते इत्यत्र कर्त्रादिपरं यत्पदं चैत्रपदं दृश्यते इत्याख्यातपदं च तयोः समभिव्याहारः संख्यान्वयबुद्धि
त्वावच्छिन्नप्रयोजकविषयितानिरूपक इति तत्पदोत्तरं चैत्रपदोत्तरं तृतीयारूपविभक्तिरिति कर्त्रादिपरस्व
पदाख्यातपदयोः समभिव्याहारः संख्याप्रकारकस्वविशेष्यकबुद्धित्वावच्छिन्नप्रयोजकं यत् विषयित्वं तन्निरू
पकस्तत्पदोत्तरं स्वपदोत्तरं तृतीयाविभक्तिर्न भवति किंतु स्वपदोत्तरं प्रथमैव भवति इत्यं तदुपपादयति प्रथमा
स्थले इति चैत्रेणाश्वं दृश्यते इत्यत्र चैत्रपदं स्वपदं तस्य दृश्यते इत्याख्यातपदं तस्य च परस्परसमभिव्या ।

हारः तस्यैव तद्विशेष्यकस्वविशेष्यकसंख्यान्वयबोधप्रयोजकतया चैत्रपदात्तृतीयानुपपत्त्यनवकाशात् चैत्रेणं
स्वं हस्यते इत्यत्र चैत्रपदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धितावच्छिन्नप्रयोजकविषयित्वाति रूपकप
वेति चैत्रेणेति तृतीयोपपत्तिरित्यर्थः द्वितीये च चैत्रः स्वं पश्यतीत्य वचनस्य देवपदं यत् चैत्रपदं पश्यतीत्याख्यात
पदं च तयोः स्वपरचैत्रपदाख्यातपदयोः समभिव्याहारस्यैव चैत्रविशेष्यकसंख्याप्रकारकान्वयबोधप्रयोजक
तया स्वपदाद्वितीयानुपपत्त्यनवकाशादिति भावः अयेत्यारभ्य तृतीयाद्वितीययोरनुपपत्त्यनवकाशादीत्य
न्तः सर्वपदत्रयेभ्यः तत्र समायातेनेव क्रमारभटीमास्वयति अनभिहितेत्यनुत्पकारेकर्तृकर्मणोस्तृतीयाच
नुशासनस्य किं फलमिति तावद्विवेकव्यं चैत्रः पचति तण्डुलः पच्यते चैत्रतण्डुलपदाभ्यां तृतीयाद्विती
ययोरप्रयोगः प्रयोगः प्रयोजनमिति चेन्न तन्न हि किंचिदप्रयोजकं प्रयोगाप्रयोगयोर्वा मणिमन्त्रादिन्यायेन तादृशानुशा
सनस्य कर्तृकर्मणोस्तृतीयेत्यनुशासनस्य तथाविधप्रयोगाविरोधिता तृतीयाद्वितीययोः प्रयोगविरोधिताः
यथा प्रतिबन्धकमणेर्दाहाभावः फलेऽस्मिन्के दाहे प्रतिमणिः प्रतिबन्धकः इत्यर्थो लभ्यते तथानुशासनेस्यन्

वृ॰टी
१३५
135

तीयाद्वितीयाप्रयोगाभावःप्रयोजनमित्युक्तेऽनुशासनेनतृतीयाद्वितीयाप्रयोगेप्रतिबंधकमित्यर्थः प्रतीयतेसच्चवसंभ
वतिस्वरूपतोऽनुशासनसत्वेपिचैत्रेणतंडुलमितितृतीयाद्वितीयाप्रयोगसंभवेनप्रतिबंधकत्वायोगाद्व्यभिचारात्
येनविरोधित्वेनतदाभावः तृतीयाद्वितीयाप्रयोगाभावःतत्प्रयुक्तोऽनुशासनेनप्रयुक्तःस्यात्नचैवंसंभवतिनत्वे
वंविरोधित्वंसंभवतिअनुशासनसत्वेपितृतीयाप्रयोगसंभवात्अनुशासनइदंफलेनसंभवतीतिव्यर्थमनुशास
नमितिभावः अनुशासनस्यप्रयोजनांतरमाशंकांवेडपतिपचतिपचतेइत्यादौक्रियायोगेकर्तृकर्मवाचकपदा
नंतरेणतृतीयाद्वितीययोरसाधुत्वस्यप्रतिपत्तिःप्रयोजनमेनमनुशासनस्येतिचेन्नअसाधुत्वपदार्थविवरणात्
तत्कर्तृत्वेनतत्कर्मत्वादिति पचतीत्यत्रपाककर्तृत्ववोधौपयिकाकांक्षाप्रथमायामेवास्तितृतीयायांतुपाककर्तृत्वा
दिवोधौपयिकाकांक्षारहितमस्तीतितदेवासाधुत्वं चैत्रःपचतीतिप्रयोगादितिभावः एवंपच्यतेऽन्यत्रपाकक
र्मत्ववोधौपयिकाकांक्षाप्रथमायामेवास्तिचैत्रेणतंडुलःपच्यतेइतिप्रयोगात्द्वितीयायांतुपाककर्मत्ववोधौ
पयिकाकांक्षारहितस्वरूपमसाधुत्वमस्तितंडुलंपच्यतेइत्यप्रयोगात् इतिचेन्नहिउक्तनियमपरतयापि

१६९

नैमित्तस्तल्लाभ इति कर्तृकर्मणोस्तत्तज्ज्ञानीयेष्वनुशासनस्य उक्तनियमपरत्वे यापि कर्त्रादिपरयत्पदोप
तपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयिताभ्यानिरूपकत्वसम्पादनत्वं तृतीया
दिविभक्तिविशिष्टनियमपरत्वापि ततः कर्तृकर्मणोरिति सूत्रात्तल्लाभः पचति पच्यते इत्यत्र क
र्तृकर्मणोस्तृतीयाद्वितीययोः साधुत्वलाभस्य सर्वः तृतीयाद्वितीययोः साधुत्वलाभाभावेऽप्रमादय
त्रिप्रथमान्तेत्यादिना प्रथमान्तं चैत्रपदं प्रथमान्तं तण्डुलादिपदं चैत्रः पचति तण्डुलः पच्यते इति तत्तदाख्या
तपदेनयोः परस्परसमभिव्याहारस्यैव चैत्रविशेष्यकतण्डुलविशेष्यकपचति पच्यते इति तत्तदाख्यातार्थकत्वप्रका
रकान्वयबोधप्रयोजकतया चैत्रेण पचति तण्डुलं पच्यते इत्यादिवाक्यघटकचैत्रतण्डुलादिपदानि वादिपद इति वादिय
दयोः समभिव्याहारस्य तथात्वेन चैत्रतण्डुलविशेष्यकतत्तदाख्याततदाख्यातार्थसंख्याप्रकारकान्वयबोधा
प्रयोजकत्वेन चैत्रेण पचति तण्डुलं पच्यते इत्येतद्वाक्यघटकत्वतृतीयाद्वितीययोः साधुत्वस्य उक्तनियमावच्छे
घत्वात् कर्त्रादिपरयत्पदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयिताति

१६५

व्यु॰टी
१३८
136

रूपकस्तत्परेतरं तृतीयादिविभक्तिरिति नियमवाक्यात् पचतीत्यत्र कर्त्तरि तृतीयानसाध्वी नेह लं पच्यते इत्यत्र कर्म
णि द्वितीयानसाध्वीत्यर्थौ न प्रतीयते इति भावः रूपणमुपसंहरति तस्मादिति तस्मात् आख्यातेन कर्तृकर्म
गतसंख्यानभिधानस्य तृतीयाद्वितीयानियामकत्वासंभवात् संख्याभाक्साधारणकर्तृत्वकर्मत्वयोः कर्तृक
र्मवाचकपदसमभिव्याहृतलकृतद्धितसमासैरनभिधानमेव तृतीयानियामकं न तु कर्तृकर्मसंख्याना
भिधानमित्यर्थः चैत्रः पचतीत्यत्र संख्याकर्मकर्तृत्वे ज्ञानातीत्यत्र गौणं कर्तृत्वं पच्यते तण्डुल इत्यत्र संख्या
कर्मत्वं ज्ञापते वट इत्यादौ गौणं कर्मत्वं वाच्यं शिरोमणिभिरेव व्रतिभेदे विहितः इति लादिना कर्तृत्वक
र्मत्वयोरनभिधानमेव तृतीयाद्वितीयानियामकमित्यत्रैव निर्भरो मुख्यत्वानामपि स्थापितमिति मित्यर्थः सु
त्रैवेत्येवकारेण संख्यानभिधानस्य तृतीयाद्वितीयानियामकत्वव्यवच्छेदः कृत्तः लादीतीनदंनभिधायकत्वं च कर्तृ
त्वकर्मत्वानभिधायकत्वं च न तद्वाचकत्वेन कर्तृकर्मत्वावाचकत्वं तद्विशिष्टस्यैव रूपकत्वं वा कर्तृत्वकर्मत्वति
ष्ठा किल तेषामतरूपस्यानियामकत्वं वा आख्यातसामान्यस्यापि आख्यातत्वेन रूपेण आख्यातत्वस्यानुगते

त्वादाह॰ तत्वादिनावाकर्तृत्वादिनिष्ठशक्तिलक्षणानिरूपकत्वात्कर्तृत्वानभिधायकाख्यातस्यैवाप्रसिद्धेर्लीदी
नाकर्तृत्वकर्मत्वावाचकरूपकर्तृत्वकर्मत्वावाचनभिधायकत्वंनसंभवतीत्यर्थः तच्छाब्दबोधौपयिकाकांक्षास्
त्यत्वमेवतदिति कर्तृत्वादिविषयकशाब्दबोधौपयिकाकांक्षापचतिपचतिपचतेइत्यत्राख्याते ऽस्तिनतुच्छून्य
त्वंचैत्रेणपच्यतेइत्याख्यातेऽस्ति तदेवनतत्कर्तृत्वकर्मत्वानभिधायकत्वंचैत्रेणपच्यतेइत्याख्यातेनहेवत्वीया
द्वितीयातिरिक्तामकमित्यर्थः तच्छाब्दबोधौपयिकांक्षाशून्यत्वमेवतदिदंचइत्यापितेत्यनेनात्विति चैत्रेणप
च्यतेतंडुलइत्यादावाख्यातस्यकर्तृत्वादिवाचकत्वेपीति आख्यातत्वेनाख्यातस्यकर्तृत्वादिवाचकत्वेकर्तृ
त्वादिवाचकत्वरूपकर्तृत्वाद्यनभिधायकत्वाभावसूचितः तथापितच्छाब्दबोधप्रयोजकाकांक्षाराहित्यमेव
कर्तृत्वाद्यनभिधायकत्वं कर्तृत्वादिविषयकशाब्दप्रयोजिकाकांक्षापचतिपच तेइत्यत्रेनेत्रमयादौवर्तते त
च्छून्यत्वंचैत्रेणपच्यतेइत्याख्यातेचैत्रविशेष्यकाख्यातार्थप्रकारकबोधानुदयात् तत्राख्यातत्वमेवचैत्रेणपच्यतेइत्या
ख्याते:ऽस्त्येवतथाचतच्छाब्दप्रयोजकाकांक्षाराहित्यरूपकर्तृत्वाद्यनभिधानस्यख्यातत्वेयोपपत्तिरित्यर्थः चैत्र।

व्यु॰टी
१३७
137

पदोत्तरतृतीयया कर्तृत्वादिविषयकबोधसंभवात् तत्र चैत्रेण पच्यते तण्डुल इत्याख्याते तादृशाकांक्षाया: कर्तृत्वशाब्दबो
धजनकाकांक्षापाश्रकत्वस्य नानतृतीययैव कर्तृत्वविषयकशाब्दबोधप्रति वीहे पच्यते इत्याख्यातस्य कारणतानकल्पने
इतिभावः चैत्रेण पच्यते इत्यादौ तृतीयानुपपत्तेरिति कर्तृत्वादिविषयकशाब्दबोधप्रयोजकाकांक्षाविरहे चैत्रेण प
च्यते इति कर्माख्यातस्थले उक्ताकांक्षाराहित्यरूपकर्तृत्ववाचकमभिधायकत्वं तृतीयादिपामकेनास्तीति तृतीयानुपप
त्तेरित्यर्थः पच्यते चैत्र इत्यादितः चैत्रादौ पाककृतेः पचे चैत्र इत्यादौ रहितात्केवलात् पच्यते इत्यादितः स्वसमभिव्याहृतवि
शेष्यवाचकपदस्याः कृतेर्बोधात्तादृशाख्यातपदतो: कर्मणि कर्तरि च तुल्यतया पच्यते इत्याख्यातयोर्वारान्तरवी
विशेषणरूपाकांक्षाया अकर्तरीव कर्मण्यपि प्रत्यये कृतिबोधोपयिकत्वात् कर्तृत्वप्रकारकशाब्दप्र
योजककोटौ निवेशनीयत्वात् उक्ताकांक्षाराहित्यरूपकर्तृत्वानभिधानस्य तृतीयाप्रयोजकस्याभावात् तृ
तीयानुपपत्तेरित्यर्थः शोकत्वेन चेति चैत्रः पच्यते इति प्रयोगं तु चैत्रपदसमभिव्याहारादे
व कृतिबोध इति प्रयोगं तु चैत्रपदसमभिव्याहार एव पच्यते इत्यत्र विवक्षितः समभिव्याहाररूपा

कांक्षैव कर्तृत्वविषयकशाब्दबोधप्रयोजकाकांक्षात्र विवक्षिता तादृशाकांक्षाराहित्यं चैत्रेण पच्यते इत्याख्याते ऽस्तीति तृती
योपपद्यते इति भावः प्रकृते चैत्रेण पच्यते तण्डुल इत्यत्र प्रकृत्यर्थव्यवहितोत्तरत्वरूपान्वयबोधरूपाकांक्षाने प्रत्यये
ऽस्ती सा च न विवक्षिता इति तादृशाकांक्षाराहित्यरूपतृतीयाप्रयोजकाभावे ऽपि प्रथमान्तचैत्रपदसमभिव्या
हाररूपाकांक्षाराहित्यरूपतृतीयाप्रयोजकस्य सत्त्वात् चैत्रेण पच्यते तण्डुल इत्यत्र तृतीयोपपद्यते इति भावः
चैत्रेणेति तृतीयान्तपदसमभिव्याहारस्थले कर्तृत्वप्रकारकशाब्दानुदयात् तृतीयान्तपदसमभिव्याहार
रूपाकांक्षा विवक्षणीयेति भावः एवं च तृतीयान्तपदानिरूपितोक्तदोषानालीढार्थः तथा सति चैत्रेण पच्य
ते इत्यादावपि तृतीयायाः साधुतापत्तेरिति कर्तृत्वप्रकारकबोधो यादृशसमभिव्याहाराज्जायते तादृशसम
भिव्याहाररूपाकांक्षा विवक्षणीया तादृशसमभिव्याहारश्च प्रथमान्तचैत्रपदसमभिव्याहाररूप एव न तु तृतीया
न्तचैत्रपदसमभिव्याहारः एवं च कर्तृत्वप्रकारकशाब्दबोधप्रयोजकप्रथमान्तचैत्रसमभिव्याहाराज्जायते तादृश
समभिव्याहाररूपाकांक्षा विवक्षणीया तादृशसमभिव्याहारश्च प्रथमान्तचैत्रपदसमभिव्याहाररूप एव न तु तृतीया

नचैत्रपदसमभिव्याहारः एवंचकर्तृत्वप्रकारकशाब्दबोधप्रयोजकश्रममांतचैत्रसमभिव्याहाररूपाकांक्षारहि
तस्वरूपतृतीयाप्रयोजककर्तृत्वानभिधानरूपकारणस्यपचतीत्याख्यातेसत्वाच्चैत्रेणपचेतीत्यादावपितृती
यायाःसाधुतापत्तेरित्यर्थः।तादृशेतितृतीयानचैत्रपदेपचतीत्याख्यातपदसमभिव्याहारस्यकृतिप्रकारकै
बोधंनौपयिकत्वात् कृतिबोधौपयिकश्रममांतचैत्रपदसमभिव्याहाररूपाकांक्षापरिहितस्वरूपकर्तृत्वानभिधा
नेरूपकारणसत्वाच्चैत्रेणपचतीतितृतीयासाधुतापत्तेरित्यर्थः।चैत्रेणविशेष्यतेमैत्रइत्यादौतृतीयानुपपत्ते
श्च विशेष्यतेमैत्रइत्यादितः कृतिबोधानादृशाख्यातपदमैत्रपदयोःसमभिव्याहारस्यकृतिबोधौपयिकत्वादितिम
लेविशेषणेचैत्रेइकर्तृप्रत्ययस्थलेकर्तृत्वबोधप्रयोजकश्रममांतचैत्रपदविशेष्यतेइत्याख्यातपदसमभिव्या
हाररूपाकांक्षासाहित्यमेव चैत्रेणमैत्रोविशेष्यतेइतिकर्माख्यातपदेस्तीतितादृशाकांक्षापरिहितस्वरूपा
कर्तृत्वानभिधानरूपकारणाभावात्तृतीयानस्यादित्यर्थः।किंचिति ततोत्पर्यसुस्वत्वमेवकर्तृत्वात्तात्पर्य
सुस्वत्वमेवकर्तृत्वानभिधायकत्वमाख्यातेनयथाचचैत्रेणपच्यतेइत्यादावाख्यातस्यकर्तृ ॥

तात्पर्यंप्रथमासाधुस्तृतीयात्वसाधुरेव॰ एवंकर्तृत्वातात्पर्यमत्वाच्चैत्रेणपचतीत्यत्रतृतीयायाअसाधुत्वेपिकर्तृत्व
रूपाख्यातार्थाविवक्षायांतृतीयायाःसाधुत्वापादनेपिचैत्रेणपचतीप्रयोगाभावःपरस्मैपदासाधुत्वादेवसमर्थ-
नीयः शेषात्कर्तरिपरस्मैपदमित्यनुशासनात् तिप्वाडि॰ त्वस्वरितेत्वनिमित्तहानाद्धातोःकर्तरिकर्तृत्वविवक्षा
यांपरस्मैपदमितितत्तदर्थात्कस्याविवक्षायांपरस्मैपदमसाधीत्यर्थः परस्मैपदासाधुत्वंचधात्वर्थविशेष्यस्यप्र
त्ययेनाविवक्षणेभावकर्मणोरितिसूत्रेणात्मनेपदनियमानात्इतिभावकर्मणोरात्मनेपदमेवनपरस्मैप
दमितिनियमःपरस्मैपदस्यासाधुत्वेहेतुःधात्वर्थविशेष्यस्यकृतिरूपस्याविवक्षणे आख्यातेआख्यातेना
विवक्षणेआख्यातार्थकृतिर्हिकर्तरिसमवायेनसाक्षात्संबंधेनान्वेतिकर्मणिनुकृतिजन्यव्यापारजन्यफ
लवत्वरूपपरंपरासंबंधेनान्वेति भावनान्वितार्थेयत्वंसत्यमर्थः फलान्वितार्थेयत्वेवाद्वितीयार्थः तंडुलं
पचतीत्यत्रतंडुलवृत्तिविक्लित्त्यनुकूलव्यापारानुकूलव्यापारानुकूलकृतिमानितिशाब्दबोधात्पदार्थात
र्थप्रतिविशेष्याकृतिराख्यातार्थः तयाविवक्षितातदापरस्मैपदंसाधुपदानुकृतिर्नविवक्षितातदाभा।

वेकर्मणिमात्मनेपदमेवनपरस्मैपदमित्यर्थः अत्रौदनपकाभ्यजनेऽत्यत्रओदनोवेक्काप्रत्ययःस्वकर्तृकत्वस्योत्तरस्योभयसं
बंधेनयाकक्रियाविशिष्टायाभुजिक्रियातन्नत्वगलाधोदेशसंयोगरूपफलशालीओदनइतिशाब्दबोधःस्वपद
हृदयेयाकक्रियापरंपाककर्तृकर्तृकत्वस्यास्तत्वेभुजिक्रियायामस्ति अत्राख्यातेनस्वकर्तृककर्तृकत्वसंसर्गघटकत
याकर्तृत्वविवक्षयामपिभावेक्काप्रत्ययदर्शनेनधात्वर्थतिरूपितविषयतासामान्यंविहायविशेष्यस्यैतिवि
शेष्यतानिवेशः धात्वर्थविशेष्यीभूताख्यातार्थकृतेरविवक्षायांचैत्रेणकर्तृकःपाकइतिबोधसंभवाच्चैत्रेणपच्यतेइ
तिभावेचैत्रेणपच्यतेतंडुलइतिकर्मणिचप्रयोगाणुनभवतिशाबादिविकरणस्यासाधुत्वात् कर्तरिशवि
त्यनुशासनात् कर्तृकेसार्वधातुकेपरेशादिवितिनदर्थान्तर्कर्तृत्वतात्पर्यकसार्वधातुकयोगएवननस्मा
धुत्वाच्छपःसाधुत्वात्भावकर्मणोर्विहितेआत्मनेपदेपरेयगेवसाधुनतुशबादिरितिभावःकर्तृत्वक
र्मत्वोभयतात्पर्येणचैत्रेणपच्यतेतंडुलइत्यादयस्तुनप्रयोगाः अर्थबोधकंवाक्यंमूकमितिमभियुक्ता
नप्रयुंजतेइतिभावःकर्तृत्वतात्पर्येसामान्यतारूपकर्तृत्वानभिधायकत्वस्यकर्तृपदोत्तरन्तु ॥

तीयानियामकस्यकर्मत्वतात्पर्यशून्यत्वरूपकर्मत्वानभिधायत्वस्यकर्मपदोत्तरद्वितीयानियामकत्वस्यचाभावान्नतृती
याद्वितीययोरप्रसक्त्याकर्तृत्वपरत्वरूपकर्तृत्वाभिधानस्यकर्मत्वपरत्वरूपकर्मत्वाभिधानस्यचपच्यतेइत्या
ख्यातेसत्वात् कर्तृकर्मणोः प्रथमाप्रसंगइतिभावः तदेकत्वबोधेकर्तृत्वकर्मत्वयोर्मध्येकर्तृत्वबोधेकर्तृ
त्वान्यकर्मत्वपरत्वेनस्मर्यमाणमेवचैत्रपच्यतेतंडुलइत्याख्यातमभिन्यन्यपरत्वेनास्मर्यमाणमाख्यातेचैत्रप
च्यतेतंडुलमितिद्वितीयासमभिव्याहृतमाख्यातंतद्धर्मिकंप्रकृतान्वयबोधपरत्वज्ञानेचैत्रकर्तृकपाकबो
धपरत्वज्ञानेतादृशज्ञानत्वेनपाकक्रतिप्रकारकचैत्रविशेष्यकशाब्दबोधत्वावच्छिन्नंप्रतिहेतुत्वात्तदभावा
देवतंडुलविशेष्यकफलप्रकारकबोधोनजायतेचैत्रःपच्यतेतंडुलइतिवाक्यात्एवंचैत्रेणपच्यतेतंडुल
इतिकर्माख्यातेकर्मत्वान्यकर्तृत्वपरत्वेनाऽस्मर्यमाणकर्माख्यातंतद्धर्मिकंतंडुलविशेष्यविक्लित्तिफलप्र
कारकप्रकृतान्वयबोधपरत्वज्ञानत्वेनहेतुत्वात्तादृशहेतोरभावादेवचैत्रपच्यतेतंडुलइत्यत्रचैत्रविशेष्यकक्र
तिप्रकारकबोधोनजायतेपच्यइतिलट्कर्तरिकर्मणिचभवतीतिकर्तृत्वान्यकर्मपरत्वेनस्मर्यमाणमेवपूर्वं

मु.टी.
१४०
140

कर्मत्वात्मककर्तृत्वपरत्वेन प्रत्ययमानमेवाख्यातमित्यन्यपरत्वेन प्रत्ययमानाख्याताऽभावादन्यपरत्वेनाप्रत्ययमानाख्या
तधर्मिकप्रकृत्यन्वयबोधपरत्वज्ञानरूपहेतोरभावाच्चैत्रे तण्डुलोभयविशेष्यकशाब्दबोधाभाव इति भावः। चैत्रेण
पच्यन्ते तण्डुला इत्यादौ कर्तृत्वादावाख्यातस्य तात्पर्यग्रहे कर्मत्वाद्यन्वयबोधोऽपि न भवत्येवेति कर्तृत्वपरत्वेनाप्रत्ययमा
णाख्यातधर्मिककर्मत्वपरत्वज्ञानरूपकारणाभावात्कर्मत्वबोधोऽपि न भवत्येवेत्यर्थः। अथैतस्याश्रयस्य चैत्रेत्यन्तर्थ्ये
येनांशे कते पक्वा निर्भुक्ते चैत्रः इत्यत्र कर्मणि क्तप्रत्ययेन कर्तृत्वानभिधानात् चैत्र इत्यत्र तृतीयाकल्पनं स्यात्
एवमोदनः पक्वो भुज्यते इत्यादौ भावे क्तप्रत्ययेन कर्मत्वानभिधानादोदन इत्यत्र द्वितीयाकल्पनं स्यादित्यर्थः। स
मानकर्तृकत्वस्थानरत्वोभयसंबंधेन पाकक्रियाविशिष्टभोजनकर्मीभूत ओदन इति शाब्दबोधात्। शंकते न
चेति पक्वा निर्भुक्ते चैत्र इत्यत्र पक्वानिति क्तेन कर्मत्वाच्चैत्रवृत्तिकर्तृत्वानभिधानेऽपि भुक्ते इत्याख्यातेन चैत्र
निष्ठकर्तृत्वाभिधानान्न तृतीयाप्रयोजकानभिहितत्वमेवमोदनः पक्वो भुज्यते इत्यत्र भावे क्तप्रत्यये
नौदनकर्मत्वानभिधानेऽपि भुज्यते इत्याख्यातेनौदनकर्मत्वाभिधानान्न द्वितीयाप्रयो ॥

जकानभिहितत्वमोदननिष्ठकर्मत्वस्येत्यर्थः तत्र हेतुमाह समभिव्याहृतजभिहितत्वसामान्याभावस्य वानभिहि
तपदेन विवक्षणादिति प्रथमान्तचैत्रपदसमभिव्याहृतधंके इत्याख्यातपदाभिहितत्वमेव चैत्रवृत्तिकर्तृत्वस्ये
तिन चैत्रयदात्तृतीया एवमोदनः पक्वाभुज्यते इत्यत्रौदनपदसमभिव्याहृतभुज्यते इत्याख्यातानभिहितत्वमे
वौदनकर्मत्वस्येति न द्वितीया एवमोदनः पक्वाभुज्यते इत्यत्रौदनपदसमभिव्याहृतभुज्यते इत्याख्यातानभिहित
त्वमेवौदनकर्मत्वस्येति न द्वितीयः प्रयोजकमनभिहितत्वमित्यर्थः समभिव्याहृतेति करणचैत्रेण गम्यते या
मः ग्रामं चैत्रो गच्छतीत्यादौ न तृतीया द्वितीययोरनुपपत्तिरिति चैत्रनिष्ठकर्तृत्वे गच्छतीत्याख्यातपदाभिहित
त्वसत्त्वात् चैत्रेणेति तृतीया न स्यादतः समभिव्याहृतेति तथा च गच्छतीत्याख्याते भिन्नवाक्यस्थमिति चैत्रपदं सम
भिव्याहाररूपकांक्षारहितमिति चैत्रेणेति समभिव्याहृतं गम्यते इत्यापदं तदभिधेयत्वे स्यात्तत्रानितत्कर्मत्वे
तदभिधेयत्वसामान्याभावरूपमहृभिधेयत्वं चैत्रनिष्ठकर्तृत्वे इति तृतीयोपपत्तिरेवं गम्यते इत्याख्यातपदा
भिधेयत्वं नास्तीति तच्छ हृवी थं कर्मत्वे इति तन्नास्तीति द्वितीया न स्यात्समभिव्याहृतेति विशेषणात्तभिन्नवाक्य

व्यु॰टी
१५१
151

स्वं गम्यते इत्याख्यातपदमिति द्वितीयांतपदसमभिव्याहृतेन भवतीत्यंतमिति द्वितीयांतपदसमभिव्याहृतमेकवाक्य
स्थं गच्छतीत्याख्यातेन तदभिधेयत्वं मैत्र हृति कर्तृत्वेन तदभिधेयत्वसामान्याभावरूपमेनभिहितत्वं तमिति कर्मत्वे इति
द्वितीयापत्तिरित्यर्थः गच्छति गम्यते इत्यादावाख्यातस्य तत्पदार्थसमभिव्याहृतत्वादिति गच्छतीति भिन्नवाक्य
पदाख्यातस्य चैत्रेणेति तृतीयांतपदासमभिव्याहृतत्वादेव गम्यते भिन्नवाक्यपदाख्यातस्यैनमिति द्वि
तीयांतकर्मवाचकपदासमभिव्याहृतत्वादित्यर्थः सुप्तेति हृद्वर्पत्नी समापते तथा सतीति समभिव्याहृत
पदाभिधेयत्वसामान्याभावरूपतृतीयाद्वितीयानियमतोऽङ्गीकारे सतीत्यर्थः भुञ्जानेन चैत्रेण पच्यते भोक्त
व्यमोदनं पचतीत्यादौ तृतीयाद्वितीययोरनुपपत्तिः कृताकर्तृत्वकर्मत्वयोरभिधानादिति मूलं भुञ्जानेनेति
कर्तृशानचा चैत्र हृति कर्तृत्वाभिधानादेव भोक्तव्यमिति कर्मणि तव्येनौदन हृति कर्मत्वाभिधानात्तृतीया
द्वितीये न स्यातामिति समभिव्याहृतपदाभिहितत्वसामान्याभावरूपमनभिहितत्वं तृतीयाद्वितीयाप्रयो
जकमिति वक्तुमशक्यमिति भावः शोकेनेह कृता इत्यारभ्य चेदिसंतेन कृता कर्तृशानं चानत्र भुञ्जानेते ने

१५१

तिवाक्येचैत्रइतिभोजनकर्तृत्वाभिधानेपीत्यनचैत्रेणोक्तितृतीयापाप्रसंगाभावेपिएवंकृताकर्मणानयताभोज
नकर्मत्वाभिधानेपीत्यनेनोदनमितिद्वितीयापाप्रसंगाभावेपि शंकामप्येसमाधत्तेपाककर्तृत्वेपाककर्मत्वमन
भिहितमितिचैत्रेणोतितृतीयाओदनमितिद्वितीयाचोपपद्यतेनयाचस्वसमभिव्याहृतपदाभिहितत्वसामा
न्याभाववत्वयत्किंचित्कर्तृत्वेएवतृतीयेतिशंकाशयः चैत्रेणपच्यतेओदनइत्यत्रस्वंचैत्रेणेतितृतीयांतेनसम
भिव्याहृतंपच्यतेइत्याख्यातपदेनदभिहितत्वमोदनइतिकर्मत्वेनत्सामान्याभाववतिपाकादिरूपयत्किंचि
त्क्रियानिरूपितकर्तृत्वेएवतृतीयेत्यर्थः एवंस्वद्वितीयांतमोदनपदंतत्समभिव्याहृतपचतिइतिपदा
भिहितत्वसामान्याभाववत्पाककर्मत्वेएवद्वितीयेत्यर्थः अथेतिपूर्वपक्षीसमाधत्ते नहिप्रकृतेपितदनहि
तमेवेति पक्वातिभुंक्ते चैत्रइत्यत्राख्यातेनभोजनकर्तृत्वाभिधानेपिपाककर्तृत्वमनभिहितमेव तथाओद
नःपक्वाभुज्यतेइत्यत्राख्यातेनभोजनकर्मत्वाभिधानेपिपाककर्मत्वमनभिहितमेवेत्यर्थः स्वसमभिव्याहृतप
दाभिहितत्वसामान्याभाववत्प्रधानक्रियाकर्तृत्वेएवतृतीयेत्याशयेनशंकते नचेति भुंजानेनचैत्रेणपच्यते

ओदन इत्यत्र स्वं चैत्रपदं तृतीयान्तेन तत्समभिव्याहृते पच्यते इत्याख्यातपदे तदभिहितत्वमोदननिष्ठकर्मत्वे तदभिहितत्व
सामान्याभावस्य चैत्रवृत्तिप्रधानयाक्रियानिरूपितकर्तृत्वे इति चैत्रेणेति तृतीयेत्यर्थः तदुक्तं प्रधानशक्त्यभिधा
ने गुणशक्तिरभिहितवत्प्रकाशते इति शक्तिः कर्तृत्वादीनि वाच्यमिति न च प्रधानक्रियानिरूपितकर्तृत्वाद्यनभि
धाने तृतीयादेः साधुतेति पक्वान्नमिति चैत्र इत्यत्र गौणपाकक्रियानिरूपितओदनकर्मत्वाभिधानेपि प्र
धानीभूतभोजनक्रियानिरूपितकर्तृत्वानभिधानाद्द्वितीयापत्तिर्भवेदेवमोदनः पक्त्वा भुज्यते इत्यादौ क्त्वा
प्रत्ययेन ओदनकर्मत्वानभिधानेपि प्रधानीभूतभोजनक्रियानिरूपितकर्मत्वाभिधानान्न द्वितीयापत्तिर्नेति किं
तु प्रथमैवेत्यर्थः एवं भुंजानेन चैत्रेणापच्यते ओदन इत्यत्र भुंजानेनेति शानचा चैत्रनिष्ठकर्तृत्वाभिधानेपि
प्रधानीभूतपाकक्रियानिरूपितकर्तृत्वानभिधानाच्चैत्रेणेति तृतीयापत्तिरेवं भोक्तुमोदनं पचतीत्या
दौ तुमुना भोजनकर्मत्वाभिधानेपि पचतीति प्रधानक्रियाकर्मत्वानभिधानादोदनमिति द्वितीयानुपप
त्तिर्नास्तीत्यर्थः तदुक्तमिति प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् शक्तिर्गुणाश्रया तत्र प्रधानम

रूप्यत्वेऽपि निवाक्यपदीमर्थं तेनानुवदेति प्रधानशाब्दाभिधानेगुणशक्तिरभिहितवत्प्रकाशनेऽपि इति भोक्तव्य
मोदनेपचतीत्यत्रौदनेगौणभोजनक्रियानिरूपितकर्मत्वमेकं प्रधानपाकक्रियानिरूपितकर्मत्वं द्वितीयं तत्रप्र
धानकर्मण्यनभिहितेगुणकर्मण्यनभिहितवत्स्यादिति तदुक्तं हरिणा उक्तमेवोक्तं तोयानिकविड्क्तमनुक्तं तो प्र
त्तकमपिनोक्तंस्यात्क्वाचिदेवपदांतरेरीति मेजानन्नेत्रःपचतीत्यत्रकृदाख्यातान्योकर्तृत्वोक्तं पचेम् भोक्तव्यमोद
नेपचतीत्यत्रकृतोक्तमव्याख्यातेनानुक्तमितिद्वितीयम् नितियंजानातीत्यत्रकृदाख्यातान्यातियानुक्तेस्तनी
येनत्यांभोक्तव्यमोदनंपचति चैत्र इत्यत्रप्रधानपाकक्रियानिरूपिते चैत्रद्वत्तिकर्तृत्वमाख्यातोक्तमिति प्र
धानशक्त्यभिधानशक्त्यभिधानेभोक्तव्यमितिकर्मकृतानभिहितमपि चैत्रनिष्ठकर्तृत्वंगौणभुजि
क्रियानिरूपितमभिहितवत्प्रकाशते इति भोक्तव्यमोदनंपचति चैत्र इत्यत्र न चैत्रपदान्ततीयापत्तिरिति
पि:अयेतिसर्वपदीसमाधत्ते तथापि चैत्रेणाहश्यमाने च दर्शमेत्रः पश्यतामादौ ज्ञानभेदेन विषयताभेदा
भावात्चैत्रदर्शनमेत्रदर्शनोभयनिरूपितविषयत्वरूपकर्मताया:कृताभिधानात्द्वितीयानुपपत्ति

व्यु॰टि
१५३
143

रितिचेन्नेति अत्रमैत्रसमवेतदर्शनविषयत्वरूपकर्मताप्रधानक्रियानिरूपितकर्मतासैवहन्तादृश्यमान
मितिकर्मशानचाभिहिताइतिचेत्पदोत्तरंप्रथमास्यादनभिहिताधिकारीयाद्वितीयानस्यादित्यर्थः अपसिद्धो
त्तिप्रनभिधानपदार्थनिर्वक्तिःजनुप्रातिपदिकार्थविशेषणत्वमात्रेणकर्मत्वकर्तृत्वाद्यविवक्षायाएवतदन
भिधानपदार्थत्वादितिमूलमतः प्रातिपदिकार्थत्वञ्चप्रातिपदिकार्थविशेष्यविशेषणत्वमात्रेणनत
द्विशेष्यतयापियाकर्मत्वाविवक्षाकर्तृत्वाद्यविवक्षासाविवक्षैव तदनभिधानपदार्थत्वात्कर्मत्वकर्तृ
त्वानभिधानपदार्थत्वात् एवंचैत्रेणदृश्यमानंघटंमैत्रःपश्यतीत्यादौघटनिष्ठविषयत्वलक्षणाकर्म-
ताघटंप्रतिविशेष्यीभूताविशेष्यीभूतापिचैत्रसमवेतदर्शनविषयतावान्घटस्तद्वृत्तिर्यावि
षयत्वरूपकर्मतातन्निरूपकदर्शनसमवायिमैत्रइतिशाब्दबोधात् विषयत्वमघटवृत्तिरितिविषयता
रूपाकर्मताविशेष्याविषयतावाघटइतिविषयतारूपकर्मताविशेषणमपिइतिविशेषणत्वविशेष्य
त्वोभयरूपेणाविवक्षितत्वाविशेषणत्वमात्रेणकर्मत्वस्यविषयत्वरूपस्याविवक्षितरूपानभिधानस

त्वात् चैत्रेण दृश्यमानश्च दृसैत्रः पश्यतीत्यत्र घटपदोत्तरं द्वितीयानुपपत्तिरिति सीत्यर्थः चैत्रेण पच्यते तंडुल इत्यत्र
तंडुलरूपप्रातिपदिकार्थे विशेष्ये कर्मतायाः विशेषणत्वमात्रेण विशेषणमात्रेण विवक्षा इति अविवक्षा
रूपानभिधानाभावान्न द्वितीया किंतु अभिधानात्प्रथमैव एवं चैत्ररूपप्रातिपदिकार्थे विशेष्ये विशेष
णत्वमात्रेण कर्तृत्वाविवक्षाविवक्षारूपानभिधानसत्वात् चैत्रेण पच्यते तंडुल इत्यत्र चैत्रपदात्तृतीयाश्र
त्र चैत्रो विशेषणं कर्तृत्वं विशेष्यं चैत्र इति कृतिजन्यव्यापारजन्यफलशाली तंडुल इति शाब्दबोधादि
त्यर्थः विशेषणमात्रेणेति विशेषणत्वातिरिक्तविशेष्यत्वेन कर्मत्वकर्तृत्वाद्यविवक्षायामभाववत्वेस
त्ति विशेषणत्वेन कर्मत्वकर्तृत्वाद्यविवक्षैव विशेषणत्वमात्रेण कर्मत्वकर्तृत्वाद्यविवक्षापदार्थः तत्रा
अविवक्षायामभावे सतीत्यत्र अभावद्वयनिवेशप्रयुक्तगौरवं एवं विशेषणत्वेन कर्मत्वकर्तृत्वाद्यविवक्षारूप
विशेष्यदलनिवेशप्रयोजनाभावश्चेत्तन्मनसि निधाय फलितार्थमाह तत्तत्प्रातिपदिकार्थविशेष्यतया कर्मत्व
कर्तृत्वादिविवक्षायां द्वितीयादिविभक्तेः साधुत्वमित्यर्थे तात्पर्यस्य पर्यवसितत्वादिति मूले चैत्रेण दृश्यमाने

घटं चैत्रः पश्यतीत्यत्र चैत्रसमवेतदर्शनविषयाभिन्नघटविषयताकदर्शनाश्रयो मैत्र इति बोधात् घटादिरूप
तत्तत्प्रातिपदिकार्थविशेषणतायाः विषयतारूपकर्मत्वे सत्वात् न द्वितीयानुपपत्तिरित्यर्थः कर्मत्वकर्तृत्वादौ प्रातिप
दिकार्थनिष्ठविशेषणतानिरूपितविशेष्यत्वेनानभिधानवदर्थ इति फलिते तात्पर्यस्य पर्यवसितत्वात् निष्ठि
तत्वात् इदमनभिधानेनाभिधानाभावरूपपदलभ्यं यत्तत्त्वं भवति किंतु तात्पर्यविषयीभूतमित्यर्थः शेषमा
ख्यातार्थविचारे विवेचयिष्यत इत्यलमत्राधिकेनेति यत्तु प्रातिपदिकार्थस्य विशेषणत्वाविवक्षायां तृतीयाविशे
ष्यत्वविवक्षायां प्रथमेत्युक्तं तच्च लक्षणतद्धितसमासैरभिधानेऽश्वोपक्रमेनेति वैयाख्यानादिना कर्तृत्वबोधवि
वक्षायामकार्थत्वात्तृतीयानिष्पत्तेः आख्यातेन कर्मत्वबोधविवक्षायां द्वितीयापत्त्यनाकांक्षेत्यादिकं शेषमि
त्यर्थः इति पश्यतीत्यादेः स्वपर्यवसानाविरतेः आख्यातद्विवचनबहुवचनयोस्तु संख्याबोधकत्वमावश्यकमिति
आख्यातैकवचनस्यैकत्वमर्थः किं त्वावश्यकं स्वप्रयोजकत्वमर्थः आख्यातं विनापि हस्तो घट इत्यादौ स्वप्रयोजकत्व
शक्तिप्रवेशकीभावः कथयति स्वयतीत्यत्र आख्यातमेव बहुत्वं बोधयति बहुवचनस्वभावात् कलंक इति प्रथमो

पच्छिन्नस्वपःपकवलक्षणात् समाधत्ते कर्तृकर्मणोःकृतिषष्ठीअन्तशिक्षानस्माःकर्तृत्वादौलक्षणाभ्रमप्याऽ
न्नुशासनिकातिरिक्तविभक्तेरपिलक्षणांगीकारेणचैत्रोमैत्रस्यगच्छतःइत्यत्रचैत्रपदोत्तरस्वपःमैत्रपदोत्तर
स्योवायथाद्वित्वेलक्षणातथाअन्तरङ्गात्तुजवःसेतुयेष्याःइत्यादिच्छेदसापिपंथ्याःइतिसोरपिवज्रत्वेलक्षणा
त्तुपथ्यानस्यर्षीसंभवात्पथ्याइत्यत्रादेशेनसहनाशोजसादिरूपथ्यानिरुक्तिलक्षणाद्वित्ववज्ञत्वबोधनि
वीहायवक्ष्यमिसुपोलुगित्यादिसूत्रेणौजसादिस्थानेस्यायादेशस्यैवपथ्यानितिमूलंपथ्यपिसुपोलुगकृत्स्व
सवर्णाच्छेयाआकाराजालइतिसूत्रेविभक्तिकसुपदेअतःसुपांसुलुगित्यादीतिवक्तव्यविनेअन्यत्ताविस्मादिदी
निवृत्त्यर्थमितिकोऽवयवइतिकोशानन्तपाधिविभक्त्यन्तस्यप्रतीकस्याधारणंसाप्रदायिकमितिसुरिस्वपस्य
लिमिनिभावःअन्तरङ्गत्वाज्जवःसेतुपथ्याःइत्यत्रजसःसादेशाः परमेव्योमन्नित्यत्रसमम्यालुकपीत्यामत्याअस
वेषीनामतीइतिऽकारस्यसवर्णसवर्णाःपूर्वमात् शेपाआत्याणवश्वालइसुहादणीपातिचैत्रादिपदोत्तरैकवचनस्याद्दि
त्वादित्याद्यणिकत्वे तदप्रकृतिचैत्रपदोत्तरस्वपोऽप्रकृतिमैत्रपदंतथामैत्रादिसापारणाद्वित्वादिवोपेचप्रत्य

व्यु॰टी॰
१४५
145

यानीप्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिविरोधेनानुपपत्तिश्च चैत्रपदोत्तरं स्वैकत्वस्य मैत्रेऽन्वयानुपपत्ति
श्चेत्यर्थः चैत्रमैत्रावनेकपदोत्तरानेकस्य पौदन्वत्वलक्षणया अनेकवृत्त्वबोधोपपत्तिरपि द्वन्द्वोत्तरैकवचनस्य पोहि
त्ववृत्त्वादिलक्षणेति भावः आख्यातार्थहिंसादिप्रकारकान्वयबोधे च समानविशेष्यकालेख्याविशिष्य चैत्रमैत्रोभय
विशेष्यतः विशेष्यतया पत्याउदृशीपातदर्शाख्यातार्थभावनान्वयबुद्धित्वरूपाः सामग्रीप्रयोजिता सामग्र्यपेताशक्तिमाह
भावनायाइति चैत्रमैत्रयोर्गमनानुकूलाकृतिनीत्यनीतिवाधयस्वकालेपवनत्र चैत्रमैत्रोभयविशेष्यकभावनाप्र
कारकान्वयबोधेनान्यर्थशून्यकालेवउन्नस्थले चैत्रो मैत्रश्च गच्छतः स्वस्थतमस्थले हि नान्वयबोधाभावान्न वाच्याभा
वतीत्यर्थयोग्यताकांक्षादिज्ञानरूपासामग्र्यपेक्षिताः तत्र समानविषयकेति विहाय समानविशेष्यकत्वनि
वेशप्रयोजनमाह भावनायाश्चविशेष्यतावच्छेदे सांख्याया बोधाश्चेति संख्याप्रकारकान्वयबोधे प्रति
समानविशेष्यताप्रत्याससाख्यातजन्यगमनानुकूलकृतिरूपभावनोपस्थितित्वेन कारणता चैत्रो मै
त्रश्च गच्छत इत्यत्र हि त्वसंख्याबोधः कार्यमाख्यातजन्यभावनोपस्थितिः कारणं च समानविशेष्यताप्र

त्वासत्त्वाचैत्रमैत्रोभयत्रास्तित्तत्रसमानविशेष्यतास्थानेसमानविषयतानिवेशःविषयतासंबंधेनतत्रगमनानुकूल
कृतिरूपभावनोपस्थितिर्यात्यर्थगमनेपीतियात्यर्थविशेष्यकसंख्याप्रकारकशाब्दाभावाद्व्यभिचारइतिविशेष्यता
निवेशः यात्यर्थगमनेतोत्वविशेष्यतासंबंधेनगमनानुकूलकृतिभावनोपस्थित्यभावान्नव्यभिचारइति गम
नानुकूलकृतिमेनोद्वित्वविशिष्टौचैत्रमैत्रावितिबोधोदयात्तत्रबोधेसंख्यान्वयबुद्धित्वमस्तिभावनाचयत्र
द्वित्वेचास्तिभावनामविषयाकमाख्यातेनसंख्यान्वयबोधः कदापिनभ्यंजन्यतेचैत्रमैत्राभ्यांसूयतेइतिभा
वाख्यातेनसंख्यामविषयीकृत्यापिभावनाप्रकारकबोधोजन्यतेइतिसंख्यान्वयबोधंयत्रव्यापकेभावनान्व
यबोधंयत्रव्यापकेभावनान्वयबोधंतत्त्वमेवाख्यातजन्योपस्थितेःकार्यतावच्छेदकमभ्युपगन्तव्यमिति द्वितीय
स्येतिद्वितीयस्यसंख्यान्वयबुद्धित्वभावनान्वयबुद्धिसामग्रीसामग्रीजन्यतावच्छेदकत्वासंभवादित्यर्थः दिगिति
भावनान्वयबुद्धित्वसंख्यान्वयबुद्धित्वयोस्सम्प्रयोर्भावित्वयबुद्धिसामग्रीकार्यतावच्छेदकत्वेविरोधिबुद्धिसामग्रीप्रति
बंधकतास्थलेप्रतिबध्यप्रतिबंधकभावद्वयापत्तिरितिदिगर्थः अथयत्रणादिवाचकापदेतत्रेति नयानसमवा

येनशेषेणगुणानंगीकारादितिभावः सर्वपदेशोक्तेनैतेनैवेति तत्ररूपेरूपाणीत्यादौ द्रव्यसमवेतत्वेद्वित्वादिस्वाश्रय
समवेतत्वसंबंधेन स्ववटपटादिसमवेतत्वेद्वित्वादिकंतदाश्रयघटादिसमवेतत्वसंबंधेनद्वित्वादिकंरूपेभासतइत्यर्थ
शंककःसमाधत्ते एकत्वस्यावाधि नाहृशसंबंधेनद्वित्वादेःपर्याप्तिसंबन्धेनएकमात्रनिष्ठत्वात्पर्याप्तिवचनापत्ति
रित्यर्थः ग्रन्थेन्याशुक्तशंकायांसमाधत्ते अपेक्षाबुद्धिविषयत्वमेवेति रूपेरूपाणीतिरूपपदोत्तरद्विवचनादिना
इदमेकंरूपंइदमेकंरूपमित्यपेक्षाबुद्धिविशेष्यविषयत्वरूपंद्वित्वादिकंबोध्यंतेनतत्रापेक्षाबुद्धिविषयत्वरूप
द्वित्वबहुत्वंच एकमात्रवृत्तिधर्मस्यरूपत्वसंयोगत्वादेः अमात्रवृत्तिधर्मस्यरूपत्वसंयोगत्वादेः
प्रकारतयैतावच्छेदकत्वस्थले रूपेरूपाणिसंयोगौसंयोगाः इत्यादौरूपत्वसंयोगत्वादेरेकमात्रधर्मस्य
प्रकारतयैतावच्छेदकत्वस्थलेरूपत्वसंयोगत्वादेरूपप्रकारतयैतावच्छेदकत्वापन्नविशिष्टपर्याप्तिसंबंधेनप्र
कारतयैरूपसंयोगादौद्वित्वबहुत्वादिकमन्वेतीत्यर्थः अन्यत्रेतियत्रसंयोगविभागावित्यत्रप्रकारतय
तावच्छेदकेनैकंकिंतुसंयोगत्वविभागत्वरूपेणनानाषडूपपर्याप्तेरेवद्वित्वादीनांसंबंधः तत्रसंयोगा॰

विभागाविच्छिन्नपर्याप्तिर्नसंयोगत्वपाप्यानत्वाविभागत्वव्याप्येति नहंसादिष्वलोक्तदोषः इतीति
कु॰टी पर्वतखदिरादिनिष्ठपर्वतद्वयखदिरद्वयबोधापत्तिरूपोदोषइत्यर्थः प्रकृत्यर्थतावच्छेदकपर्वतत्वव्याप्या
१५७ पर्याप्तिर्पर्वतद्वय एवं एवं प्रकृत्यर्थतावच्छेदकखदिरत्वे व्याप्यापर्याप्तिर्खदिरद्वय एवेति प्रकृत्यर्थतावच्छे
157 दकव्याप्तपर्याप्तिसंबंधेनन हित्वान्वयः स्वीक्रियते किंतु शुद्धपर्याप्तिसंबंधेनैवेति भावः इतीति प्रकृत्य
र्थतावच्छेदकसंख्यान्वयव्युत्पत्तिवादे प्रथमाविभक्त्यर्थविवरणं ॥